Shri Raghunatha Temple MSS. Library,
JAMMU

No. १४८ / घ

Title अष्टाध्यायी सूत्रार्थ संग्रहस्य सप्तमाध्यायः

Author

Extent ९ पत्रं Age सं. १८५३

Subject व्याकरण

अष्टाध्यायी
सूत्रार्थसंग्रहस्य सप्तमाध्यायः

(४७)

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् लोपः पिबतेरीच्चाभ्यासस्य तिष्ठतेरित् जिघ्रतेर्वा उर्ऋत् नित्यं छन्दसि दयतेर्दिगि लिटि ऋतश्च संयोगादेर्गुणः ऋच्छत्यॄताम् शॄदॄप्रां ह्रस्वो वा केऽणः न कपि आपोऽन्यतरस्याम् ऋदृशोऽङि गुणः
अस्यतेस्थुक् श्वयतेरः पतः पुम् वच उम् शीङः सार्वधातुके गुणः अयङ् यि क्ङिति उपसर्गाद्ध्रस्व ऊहतेः एतेर्लिङि अकृत्सार्वधातुकयोर्दीर्घः च्वौ च रीङ् ऋतः रिङ् शयग्लिङ्क्षु गुणोऽर्तिसंयोगाद्योः यङि च ई घ्राध्मोः अस्य च्वौ क्यचि च

नोपधाया ह्रस्वः मालामाख्यदमालत् अममानत् राजानमतिक्रान्तवानत्यरराजत् अशशासत् बाधृ अबबाधत् याचृ अययाचत् २ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् अशनायोदन्य धनाया बुभुक्षापिपासा गर्द्धेषु न छन्दस्य पुत्रस्य
एषां णौ चङ्युपधाया ह्रस्वो वा अबिभ्रजत् अबभ्राजत् अबीभसत् अबभासत् अबभाषत् अबीभषत् अदिदीपत् अदीदिपत् अजिजीवत् अजीजिवत् अमिमीलत् अमीमिलत्
अपिपीडत् अपीपिडत् ३ लोपः पिबतेरीच्चाभ्यासस्य णौ चङि पिबतेरुपधाया लोपः अभ्यासस्य चेकारादेशः अपीप्यत् ४ तिष्ठतेरित् णौ चङि तिष्ठतेरुपधाया इकारादेशः अति
ष्ठिपत् ५ जिघ्रतेर्वा इकारादेशः अजिघ्रिपत् अजिघ्रपत् ६ उर्ऋत् णौ चङ्युपधाया ऋवर्णस्य स्थाने ऋकारादेशो वा उरणरपरापवादः अचिकीर्तत् अचीकृतत् अववर्तत् अवीवृतत्
अममार्जत् अमीमृजत् ७ नित्यं छन्दसि [illegible] अवीवृधत् पुरोडाशेन ८ दयतेर्दिगि लिटि आदेशः दिग्यादेशो द्वित्वेन एम दिग्ये दिग्याते दयतेरिति तिपि [illegible]
तादस्य तस्य लिङ्गविधेः ९ ऋतश्च संयोगादेर्गुणः संयोगादेर्ऋदन्तस्य लिटि गुणः सस्वरतुः दध्वरुः ऋतः किम् क्षिक्षियतुः संयोगादेः किम् चक्रतुः प्रतिषेधविषये गु
णः इति विषयेऽत्र पूर्वविप्रतिषेधेन वृद्धिरेव सस्वार सस्मार लिटीत्येव स्मृतः १० ऋच्छत्यॄताम् ऋच्छतेर्ऋ इत्यस्य ऋकारान्तानां च लिटि गुणः आनर्च्छतुः आरुः कॄ चकरतुः गॄ जग
रतुः णलि चकार जगार ११ शॄदॄप्रां ह्रस्वो वा लिटि शश्रतुः शशरतुः दद्रुः ददरुः पप्रुः पपरुः १२ केऽणः केप्रत्यये परेऽणो ह्रस्वो भवति ज्ञका कुमारिका किशोरिका अ
णः किम् गोका नौका १३ न कपि कपि परेऽणो न ह्रस्वः बहुकुमारीकः बहुवधूकः १४ आपोऽन्यतरस्याम् आबन्तस्य कपि ह्रस्वो न वा बहुमालकः बहुमालाकः ऋदृशोऽङि गु
णः ऋवर्णान्तानां दृशेश्चाङि गुणः इदं तेभ्यः करनमः असरत् आरत् जरा अदर्शत् १६ अस्यतेस्थुक् आगमोऽङि आस्थत् १७ श्वयतेरः अङि अश्वत् १८ पतः पुम् आगमोऽङि अपप्त
त् १९ वच उम् आगमोऽङि अवोचत् २० शीङः सार्वधातुके गुणः शेते शयाते सार्वधातुके किम् शिश्ये अयङ् यि क्ङिति क्ङिति यादौ शीङोऽयङादेशः शय्यते शाशय्यते प्रशय्य यीति
किम् शेयम् २२ उपसर्गाद्ध्रस्व ऊहतेः उपसर्गात्परस्योहतेर्ह्रस्वः स्याद् यादौ क्ङिति परे समुह्यते समुह्यमानः उपसर्गादिति किम् ऊह्यते ऊहतेः किम् समीह्यते यीत्येव समूहित
क्ङितीत्येव अभ्यूह्यायम् अणरत्येव आङि ओह्यते २३ एतेर्लिङि उपसर्गात्परस्यैतेरणो ह्रस्वः स्यात् लिङि यादौ क्ङिति ह्रस्वः उदियात् समियात् अकृत्सार्वधातुके दीर्घे कृते नैव ह्रस्वः उप
सर्गादित्येव ईयात् अणरत्येव आ ईयात् एयात् समेयात् अकृत्सार्वधातुकयोर्दीर्घः कृत्सार्वधातुकभिन्ने क्ङिति यादौ परेऽजन्ताङ्गस्य दीर्घः भृशायते चीयते लोलूयते चीयात् अकृ
त् किम् प्रकृत्य असार्वधातुक इति किम् चिनुयात् २५ च्वौ च अजन्ताङ्गस्य दीर्घः शुचीकरोति पटूभवति हेतुः स्यात् २६ रीङ् ऋतः ऋदन्ताङ्गस्य रीङादेशः अकृत्सार्वधातुकयोश्च्वौ च परतः
मात्रीयति पित्रीयते चेक्रीयते २७ रिङ् शयग्लिङ्क्षु ऋदन्तस्य रिङादेशः शे यकि लिङि यादावसार्वधातुके म्रियते क्रियते क्रियात् असार्वधातुक इत्येव बिभियात् यीत्येव हृषीष्ट
२८ गुणोऽर्तिसंयोगाद्योः ऋतो यकि लिङि च निवर्त्तते असंभवात् यो अर्त्तेः संयोगादेर्ऋदन्तस्य च गुणः स्यात् यकि लिङि च यादावार्धधातुके अर्यते स्मर्यात् यीत्येव स्मृषीष्ट असार्वधा
तुक इत्येव स्मृयात् २९ यङि च अर्त्तेर्गुणः अरार्यते सास्मर्यते ३० ई घ्राध्मोः घ्राध्मोरन्त्यवर्णस्य ईकारादेशो यङि जेघ्रीयते देध्मीयते ३१ अस्य च्वौ अवर्णान्ताङ्गस्य च्वावीकारादेशः सितीकरो
ति असितीभवति ३२ क्यचि च अस्य ई पुत्रीयति मालीयति अकृत्सार्वधातुकदीर्घापवादः ३३ अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु एते क्यजन्ता बुभुक्षादिषु निपात्यन्ते अशनाय
ति उदन्यति धनायति बुभुक्षादिष्विति किम् अशनीयति उदकीयति धनीयति ३४ न छन्दस्यपुत्रस्य पुत्रवर्जितावर्णान्ताङ्गस्य क्यचि ईकारो न मित्रयुः स्वेदयुः अपुत्रस्येति किम् पुत्रीय

दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति अश्वाघस्यात् देवसुम्नयोर्यजुषि काठके कव्यध्वरपृतनस्यर्चिलोपः द्यतिस्यतिमास्थामित्ति किति २ शाछोरन्यतरस्याम् दधातेर्हिः जहातेश्च क्त्वि विभाषा छन्दसि सुधितवसुधितनेमधितधिष्वधिषीय च दोद
द्घोः अच उपसर्गात्तः अपो भि सः स्यार्द्धधातुके तासस्त्योर्लोपः रि च ह एति यीवर्णयोर्दीधीवेव्योः सनि मीमाघुरभलभशकपतपदामच इस् आप्ज्ञप्यृधामीत् दम्भ इच्च मुचोऽकर्मकस्य गुणो वा अत्र लोपोऽभ्यासस्य ह्रस्वः हलादिः शेषः २ शर्पूर्वाः खयः कुहोश्चुः न कवतेर्यङि कृषेश्छन्दसि

अ॰ धा॰ सू॰ ८

4

नः सदानवः ३५ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति छन्दस्येते निपात्यन्ते भाषायां तु दुष्टीयति द्रविणीयति वृषीयति रिष्टीयतीति ३६ अश्वाघस्यात् अश्वअघ अनयोः क्यचि छन्दसि विषये ।
आदादेशः अश्वायन्तो मघवन् मा त्वा वृका अघायवो विदन् ३७ देवसुम्नयोर्यजुषि काठके क्यचि आत् देवायन्तो यजमानाः सुम्नायन्तो हवामहे यजुषीति किम् देवाः किम गायसुम्नयुः
काठक इति किम् सुम्नयुरिदमासीत् ३८ कव्यध्वरपृतनस्यर्चिलोपः एषां क्यचि लोपः ऋग्विषये कव्यति अध्वर्यति पृतन्यति द्यतिस्यतिमास्थामित्ति किति एषामिकारादेशः किति ता
दौ दितः सितः मितः स्थितः तीति किम् अवदाय किति किम् अवदाता ४० शाछोरन्यतरस्याम् इकारादेशः तादौ किति निशितं निशातम् छितम् छातम् ४१ दधातेर्हिः तादौ कि
ति निहितम् निहितवान् हित्वा ४२ जहातेश्च क्त्वि हिरादेशः हित्वा दोषानगुणाँश्चिन्तु जिहीतेस्तु हात्वा ४३ विभाषा छन्दसि जहातेर्हिर्वा क्त्वाप्रत्यये छन्दसि हित्वा हात्वा शुभास्या
तापाजहातिसारलीलीत्वम् ४४ सुधितवसुधितनेमधितधिष्वधिषीय च छन्दस्येतानि निपात्यन्ते सुवसुनेमपूर्वस्य दधातेः क्तेः इत्वमिड्वा गर्भं माता सुधितम् वसुधितमग्नौ जु
होति नेमधिता बाधन्ते भाषायां तु सुहितं वसुहितं नेमहिता इति धिष्वेति लोट् मध्यमैकवचने दधातेर्हित्वाभावः एत्वं च निपात्यते धिष्वसोमम् धिषीयेति आशीर्लिङि आत्मनेपदोत्तमैकव
चने दधातेरित्वमिडागमो वा प्रत्ययस्य निपात्यते धिषीयसोमम् भाषायां तु धासीय ४५ दो दद्घोः घुसंज्ञकस्य दारूपस्य ददादेशः किति तादौ दत्तम् दत्तवान् दत्तिः दः किम् धीतम्
धेरीरूपम् घोः किम् अवदातम् मुखम् देपोरूपम् ४६ अच उपसर्गात्तः अचन्तोपसर्गाद्दावर्जिते दो घोरित्यनुवर्तते अजन्तोपसर्गात्परस्य घुसंज्ञस्य दारूपस्य चः स्थाने तादेशः स्यान्न दो किति
प्रत्तम् अवत्तम् अचः किम् निर्दत्तम् उपसर्गात् किम् दधि दत्तम् वारिम्नेव अवदातम् ४७ अपो भि अप इत्यस्य तकारादेशो भादौ प्रत्यये अद्भिः भीति किम् अप्सु ४८ सः स्यार्द्धधातुके ।
सान्ताङ्गस्य सकारादावार्धधातुके तादेशः वत्स्यति विवत्सति जिघत्सति सः किं वत्स्यति सि किं वासः आर्धधातुके किम् आस्से ४९ तासस्त्योर्लोपः तासेरस्तेश्च सस्य लोपः सादौ प्रत्यये क
र्तासि इत्यासे असि व्यतिसे ५० रि च रादौ च प्रत्यये तासस्त्योः सस्य लोपः कर्तारौ अध्येतारः अस्तेर्लिटि व्यतिरे ५१ ह एति तासस्त्योः सस्य हादेशः एति परे कर्ताहे व्यतिहे ५२ यीवर्णयोर्दी
धीवेव्योः यादौ इवर्णादौ च प्रत्यये दीधीवेव्योर्लोपः आदीध्यगतः आवेव्यगतः आदीध्यते आवेव्यते आदीधिता आवेविता आदीधीत आवेवीत यीवर्णयोः किम् आदीध्यनम् आवेव्यनम् ।
५३ सनि मीमाघुरभलभशकपतपदामच इस् सादौ सनि परे एषामचः स्थाने इसादेशः मित्सति मित्सते दित्सति धित्सति रिप्सते लिप्सते शिक्षति पित्सति प्रपित्सते सनि किम् दास्य
ति सीत्येव पिपतिषति ५४ आप्ज्ञप्यृधामीत् एषामचामीदादेशः सादौ सनि ईप्सति ज्ञीप्सति ईर्त्सति सनीत्येव प्राप्स्यति सीत्येव जिज्ञपयिषति अर्दिधिषति ५५ दम्भ इच्च दम्भेरच इ
दादेशः चादीच्च सादौ सनि धिप्सति धीप्सति दिदम्भिषति ५६ मुचोऽकर्मकस्य गुणो वा सनि सादौ मोक्षते वत्सः स्वयमेव मुमुक्षते वा अकर्मकस्य किम् मुमुक्षति वत्सं चैत्रः ५७ अत्र
लोपोऽभ्यासस्य सनि मीमेत्यादिचतुर्दशानामभ्यासस्य लोपो वेदितव्यः तद्यथा दास्यतम् अकर्मकस्य किं मुमुक्षति वादस्मात्प्रेरभ्यासस्येति चाधिकृतं वेद्यम् ५८ ह्रस्वः अभ्या ।
सस्य इको दीर्घस्य ५९ हलादिः शेषः शिष्यतेऽवशिष्यते अभ्यासस्यादिर्हल् शिष्यते अनादिर्लुप्यते जग्लौ मम्लौ पपाठ आट आदिशेषनिमित्तो यमनादिलोपस्तत्राभ्यासत्वाद्राज्ञ यला
त्वचिदपि सन्नादिर्हल् सर्वेषामनादेर्निवृत्तिं करोति ६० शर्पूर्वाः खयः अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते अन्ये हलो लुप्यन्ते चुश्च्योत तिष्ठासति पिस्पन्दिषते शर्पूर्वाः किम् पपाच खयः ।
किम् सस्नौ ६१ कुहोश्चुः अभ्यासस्य कवर्गहकारयोश्चुत्वम् चकार चखान जगाम जघास जुहोति ६२ न कवतेर्यङि यङि कवतेरभ्यासस्य न चुत्वं यङि करीकृष्यते ६४ दाधर्ति

कोकूयते उष्ट्रः कृषेश्छन्दसि

समर्थसमुक्तर् निरसनतः

धर्त्ति दर्धर्षि बोभूतु तेतिक्ते त्यप्यनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतो दविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च छन्दस्येतानि निपात्यन्ते दाधर्त्ति धार
यतेर्यङ्लुको वा स्फोयङ्लुकि वाभ्यासस्य दीर्घत्वं निल्लुक्च एवं दर्धर्त्ति दर्धर्षीत्यभ्यासस्य एवं दर्धर्षि बोभूतु यङ्लुगन्तभवतेर्लोटि गुणाभावोभ्यासस्य ओत्वं तिङ्ति सिद्ध एव निपात्यमानो यङ्लुग्
लुगन्तस्य गुणनिषेधानुभवतीति ज्ञापयतीति बोभवीति बावदीतीत्यादि अलघीति इयर्त्तेर्लिटि पिपि अभ्यासस्य हलादिशेषापवादो रेफस्य लत्वं च आपनीफणत् आङ्पूर्वफणतेर्यङ्
लुगन्तशतरि अभ्यासस्य नीक् संसनिष्यदत् सम्पूर्वस्यन्देर्यङ्लुकि शतर्येवाभ्यासस्य नीक् धात्वसस्य षत्वम् करिक्रदत् यङ्लुगन्तक्रन्देः शतरि चुत्वाभावोभ्यासस्य ककारस्य रिगागमः कनिक्रद
त् क्रन्देर्लुङि च्लेरङादेशो द्विर्वचनमभ्यासस्य चुत्वाभावो नीगागमश्च भाषायामक्रन्दीत् भरिभ्रत् यङ्लुगन्तबिभर्त्तेर्भृञो निटि इत्वाभावो अभ्यासस्य रिगागमः दविध्वतः यङ्लुगन्तध्वरतेः शत
रि जश्त्वम् तत्राभ्यासस्य विगागमश्च लोपश्च दविद्युतत् यङ्लुगन्तद्युतेः शतर्यभ्यासस्य संप्रसारणाभावो विगागमश्च तरित्रतः तरतेः शतरि षष्ठ्येकवचनेभ्यासस्य रिगागमः सरीसृपत
म् सृपतेः शतरि द्वितीयैकवचनेभ्यासस्य रीगागमः वरीवृजत् वृजेः शतरि अभ्यासस्य मर्मृज्य मृजेर्लिटि णलि चाभ्यासस्य रुक् धातोश्च वृद्धिः आगनीगन्ति आङ्पूर्वगमेर्लिटि अभ्या
सस्य चुत्वं नीगागमश्च निपात्यते ६५ उरत् ऋवर्णान्ताभ्यासस्याकारादेशः ववृते ववर्त्ति ६६ द्युतिस्वाप्योः संप्रसारणम् अभ्यासस्य दिद्युते अदिद्युतत् दिद्युतिषते स्वापिर्ण्यन्तः सुष्वापयि
षति ६७ व्यथो लिटि अभ्यासस्य संप्रसारणम् विव्यथे लिटि किम् वाव्यथ्यते ६८ दीर्घ इणः किति इणोभ्यासस्य दीर्घः किति लिटि ईयतुः ईयुः किति किम् इयाय ६९ अत आदेः अभ्यास
स्यादेरतो दीर्घः स्याल्लिटि आट आटतुः आदेः किम् पपाच ७० तस्मान्नुड्द्विहलः तस्मादभ्यासदीर्घान्नादतः परस्य द्विहलो नुडागमो लिटि आनञ्ज आनर्च आनृञ्ज द्विहलः किम् आट ७१
अश्नोतेश्च दीर्घीभूताभ्यासात् नुडागमस्तद्वल्लिटि व्यानशे अभ्यासेत्वमाश ७२ भवतेरः भूधातोरभ्यासस्याकारादेशो लिटि ७२ बभूव ससूवेति निगमे सूतेर्लिटि वुगागमो अभ्यासस्यात्वं
निपात्यते छन्दसि ससूव भाषायां तु सुषुवे ७४ निजां त्रयाणां गुणः श्लौ निजविजविषामभ्यासस्य गुणः श्लौ सति नेनेक्ति वेवेक्ति वेवेष्टि श्लौ किम् निनेज भृञामित् भृञ्माङ्हाङामेषा
णामभ्यासस्येकारादेशः श्लौ बिभर्त्ति मिमीते जिहीते ७५ अर्त्तिपिपर्त्त्योश्च अभ्यासस्येत्वं श्लौ इयर्त्ति पिपर्त्ति ७७ बहुलं छन्दसि अभ्यासस्येकारादेशश्छन्दसि बहुलं श्लौ पूर्णां विविष्टि।
वद्दोऽनूपं जनिमा विविक्ति वचेः जिगर्त्ति जायः जिहर्त्ति हृ ७८ सन्यतः सनि परतो दन्ताभ्यासस्येदादेशः पिपक्षति पिपासति सनि किम् पपाच अतः किम् लुलूषति ओः पुयण्ज्यपरे ७९
र्णान्ताभ्यासस्येत् पवर्गयणजकारेष्ववर्णपरेषु परतः सनि पिपविषति पिपावयिषति यियविषति रिरावयिषति लिलविषति जिजावयिषति ओरिति किम् पापच्यते पुयण्जीति किं
नुनावयिषति जहावयिषति अपरे किम् बुभूषति ८० स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा एषामभ्यासस्येत्वं सनि सिस्रावयिषति सुस्रावयिषति एवमन्यदप्युदाहार्य
म् अपरे इत्येव सुस्रूषति शुश्रूषति ८१ गुणो यङ्लुकोः अभ्यासस्य वेवीयते जोहवीति ८२ दीर्घोऽकितः अकितोभ्यासस्य दीर्घो यङ्लुकोः पापच्यते पापचीति अकितः किम् यंयम्यते।
अकितः किम् यंयम्यते यंयमीति ८३ नीग्वञ्चुस्रंसुध्वंसुभ्रंशुकसपतपदस्कन्दाम् एषामभ्यासस्य नीगागमः यङ्लुकोः वनीवच्यते वनीवञ्चीति एवमन्यत् ८४ नुगतोऽनुनासिकान्तस्य अ
नुनासिकान्ताङ्गस्य योभ्यासस्तस्याकारान्तस्य नुगागमः स्याद्यङ्लुकोः तंतन्यते तंतनीति अतः किं तेतिम्यते अनुनासिकान्तस्य किं यायज्यते ८५ जपजभदहदशभञ्जपशां च।
एषामभ्यासस्य नुग्यङ्लुकोः जंजप्यते जंजपीति दंदशीति इत्यत्र नलोपाद्योक्तस्तेन यङ्लुकाविनलोपः ८६ चरफलोश्च अनयोरभ्यासस्य नुग्यङ्लुकोः ८७ उत्परस्यातः चरफलोरभ्यासात्परस्यात

सू. प्रा.
स.
६

१

उकारादेशः यङ्लुकोः चंचूर्यते चंचुरीति पंफुल्यते पंफुलीतीति यस्य किम् अभ्यासस्यमाभूत् अतः किम् अलोऽभ्यासमाभूत् ८८ तिच नादीचमण्यके रफलोरतउत् चरणं चूर्तिः प्रफुल्लाःस्नमनसः
८९ रीगृदुपधस्य च ऋदुपधाङ्गस्य योऽभ्यासस्तस्य रीग्यङ्लुकोः वरीवृश्च्यते वरीवृश्चीति ९० रुग्रिकौ च लुकि यङ्लुकि ऋदुपधस्य योऽभ्यासस्तस्य रीग्यङ्लुकोः वरीवृत्यते वरीवृतीति यङ्लुकि ऋदु
पधस्य योऽभ्यासस्तस्य रुग्रिकावागमौ भवतः वाङ्गीकु नर्नर्ति नरिनर्ति नरीनर्ति ९१ ऋतश्च ऋदन्ताङ्गीयाभ्यासस्य रुग्रिग्रीकः स्युः यङ्लुकि चर्कर्ति चरिकर्ति चरीकर्ति ९२ सन्वल्लघुनि
चङ्परेनग्लोपे लघुनि धात्वक्षरे परतो योऽभ्यासस्तस्य चङ्परे णौ सन्वत्कार्यं स्यात् अग्लोपेन अचीकरत् सन्वतः अबीभवत् ओःपुयण्ज्यपरे अपिस्रवत् असुस्रवत् स्रवतिशृणोतीति
ना लघुनि किम् अततक्षत् चङ्परे किम् पपचात्वम् परग्रहणं किं चङ्येवके वलेमाभूत् अचकमत् अनग्लोपे किम् अचकथत् ९३ दीर्घो लघोः लघोरभ्यासस्य दीर्घः सात् लघुनि चङ्परेणाव
नग्लोपे अजीहरत् लघोः किं अविभजत् लघुनीत्येव अततक्षत् ९४ अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् एषाम् अभ्यासस्यात् आदेशः चङ्परेणौ असस्मरत् अददरत् अतत्वरत् अपप्रथत् अम
म्रदत् अतस्तरत् अपस्पशत् ९५ विभाषा वेष्टिचेष्ट्योः अनयोरभ्यासस्यात् वा चङ्परेणौ अववेष्टत् अविवेष्टत् ९६ ईच गणः गणयतेरभ्यासस्येकारादेशो वा चङ्परेणौ अजीगणत् अजगण
त् ९७ ॥ इति श्री सत्रार्थसंग्रहे सप्तमाध्यायस्य तृतीयः पादः ॥ समाप्तः सप्तमोऽध्यायः ७ ॥ विक्रमार्कतिपञ्चाष्टचन्द्राद्वे श्रावणे भृगौ दर्शिकायाम् अर्थे सोऽध्यायो गोपालसूरिणा ओम्

। सर्वस्यद्वे तस्य परमाम्रेडितम् अनुदात्तं च नित्यवीप्सयोः परेर्वर्जने प्रसमुपोदः पादपूरणे उपर्यध्यधसः सामीप्ये वाक्यादेराम्रन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु एकं बहुव्रीहिवत् आ
बाधे च कर्मधारयवदुत्तरेषु प्रकारे गुणवचनस्य अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् यथास्वे यथायथम् द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु पादस्य पदान्त अनुदा
त्तं सर्वमपादादौ आमन्त्रितस्य च युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ बहुवचनस्य वस्नसौ तेमयावेकवचनस्य त्वामौ द्वितीयायाः न चवाहाहैवयुक्ते पश्यार्थैश्चानालोचने सपूर्वायाः प्र
थमाया विभाषा तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः तिङ्ङतिङः न लुट् निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तं नह प्रत्यारम्भे सत्यं प्रश्ने अङ्गाप्रातिलोम्ये हि च छन्दस्यनेकमपि साकाङ्क्षम् या
वद्यथाभ्याम् पूजायां नानन्तरम् उपसर्गव्यपेतं च तुपश्यपश्यताहैः पूजायाम् अहो च २ शेषे विभाषा पुराचपरीप्सायाम् नन्वित्यनुज्ञैषणायाम् किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् लोपे विभाषा एहिमन्ये प्र
हासे लृट् जात्वपूर्वम् किंवृत्तं च चिदुत्तरम् आहो उताहो चानन्तरम् शेषे विभाषा गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् लोट् च विभाषितं सोपसर्गमनुत्तमम् हन्त च आम एकान्तरमामन्त्रितमनन्तिके यद्धितपरं
छन्दसि चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः चादिषु च चवायोगे प्रथमा हेति क्षियायाम् ३ अहेति विनियोगे च चाहलोप एवेत्यवधारणम् चादिलोपे विभाषा वैवावेति च छन्दसि एकान्याभ्यां समर्थाभ्याम्
यद्धितुपरं छन्दसि सगतिरपि तिङ् कुत्सने च सुप्यगोत्रादौ गतिर्गतौ तिङि चोदात्तवति आमन्त्रितं पूर्वमविद्यमानवत् नामन्त्रिते समानाधिकरणे सामान्यवचनम् विभाषितं वि
शेषवचने बहुवचनम् ४ सर्वस्य द्वे वचनस्य पोषे इतिचतुरंशाः इति प्रथमाध्यायस्य प्रथमः पादः १॥ इतिसपादसप्ताध्यायी



युवोरनाकौ आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् झोन्तः अदभ्यस्तात् आत्मनेपदेष्वनतः शीङो रुट् वेत्तेर्विभाषा बहुलं छन्दसि अतो भिस ऐस् बहुलं छन्दसि नेदमदसोरकोः टाङसिङसामिनात्स्याः ङेर्यः सर्वनाम्नः स्मै ङसिङ्योः स्मात्स्मिनौ पूर्वादिभ्यो नवभ्यो वा जसः शी औङ आपः नपुंसकाच्च जश्शसोः शिः ११ अष्टाभ्य औश् षड्भ्यो लुक् स्वमोर्नपुंसकात् अतोऽम् अद्ड्डतरादिभ्यः पञ्चभ्यः नेतराच्छन्दसि युष्मदस्मद्भ्यां ङसोऽश् ङे प्रथमयो रम् शसो नः भ्यसोभ्यम् पञ्चम्या अत् एकवचनस्य च साम आकम् आत औ णलः तुह्योस्तातङाशिष्यन्यतरस्याम् विदः शतुर्वसुः समासेनञ्पूर्वे क्त्वो ल्यप् क्त्वापि छन्दसि सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः अमो मश् २।

ओं नमो गणपतये ॥ युवोरनाकौ युवु इत्येतयोरननुनासिकयोरेतौ स्तः नन्द्यादिभ्यो ल्युः नन्दनः रमणः साध्यादिभ्यो ण्वुल् लोके इव साधकः विस्कनः ण्वुल् तृचौ कारकः हारकः गान्धेवार्थे ण्व भ्यां त्रुन् वासुदेवकः आर्जुनकः कर्णिकायुक्त भुजमदिभ्यां युकन्नपि कादिर्वा दोलत्पसाहीनां नानुनासिकत्वप्रतिज्ञा अनित्यमागमानुशासनमिति युवोरित्यत्र अन इत्येतस्योगे बह्वादेसो वर्णलोपः आयने यी नी यियः फढखछघां प्रत्ययादीनाम् प्रत्ययादेः फस्य आयन् ढस्य एय् खस्य ईन् छस्य ईय् घस्य इय् स्युः नडादिभ्यः फक् नाडायनः स्त्रीभ्यो ढक् सौपर्णेयः कुलात्खः कुलीनः स्वसुश्छः स्वस्रीयः क्षत्राद्घः क्षत्रियः फकसादीनामप्ययमान

झोन्तः प्रत्ययावयवस्य झकारस्य स्थाने अन्तादेशः भवति जुहोतिभ्यां ङित् जरन्तः वेशन्तः ३ अदभ्यस्तात् अभ्यस्तात् झस्य स्थाने अदादेशः ददति दधतु जक्षति जाग्रतु आ त्मनेपदेष्वनतः अनकारात्परस्य आत्मनेपदसंबन्धिनो झस्य अदादेशः विन्वते लुनते आत्मनेपदेष्विति किम् चिन्वन्ति अनत इति किम् एधन्ते ५ शीङो रुट् शीङो गात्परस्य झा देशस्यातो रुडागमः शेरते शेरताम् ६ वेत्तेर्विभाषा वेत्तेरुत्तरस्यातो वा रुट् संविद्रते संविदते लिङिदकरणाय इत्यादिरुदाहरणं विद्रते विन्दन्ते विन्दते ७ बहुलं छन्दसि छन्दसि विषये बहुलं रुट् देवा अदुह्र दुहेर्लङि झादेशे कृते रुट् इति लोपः न च भवति अदुहत बहुलवचनादन्यत्रापि अदृश्रमस्य केनचित् ८ अतो भिस ऐस् अतोऽकारान्ताद् रामैः अ तइति किम् हरिभिः तपरकरणं किम् मालाभिः ९ बहुलं छन्दसि छन्दोविषये भिस ऐस् बहुलमैस अतइत्यस्य अनतोपि स्यात् नोपि न द्यैः देवेभिः १० नेदमदसोरकोः अककार योरिदमदसोर्भिस ऐस् न भवति अमीभिः अकोः किम् इमकैः अमुकैः ११ टाङसिङसामिनात्स्याः अतो टाङसिङसामिनात्स्याः स्युः रामेण रामात् रामस्य १२ ङेर्यः अतो ङेर्यः रामाय १३ सर्वनाम्नः स्मै अतो ङेः सर्वनाम्नो विहितस्य ङेरत्यस्य स्मैरादेशः सर्वस्मै तस्मै कस्मै १४ ङसिङ्योः स्मात्स्मिनौ अतो ङसिङ्योः सर्वनाम्नः परयोरेतयोरेतौ स्तः सर्वस्मात् कस्मिन् १५ पूर्वा दिभ्यो नवभ्यो वा पूर्वादिभ्यः स्मात्स्मिनौ विकल्पः पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे १६ जसः शी अतो जसः सर्वनाम्नः परस्य सर्वे के ये तेषामकारान्तानां जनुनी १७ औङ आपः आबन्ता दन्नात्परस्य औङः शी औङिति सज्ञा शाखामु रमे माले १८ नपुंसकाच्च क्लीबादन्तादुत्तरस्य औङः शी फले दधिनी १९ जश्शसोः शिः नपुंसकात्परयोः फलानि दधीनि जस्सा त्वर्थे

ल्पग्रहणादिह न कुण्डपाः २० अष्टाभ्य औश् कृताकारादष्टनः परयोर्जश्शसोरौशादेशः अष्टौ कृताकारग्रहणादिह न अष्ट २१ षड्भ्यो लुक् षट्संज्ञकेभ्यः परयोर्जश्शसो र्लुक् पञ्च षट् २२ स्वमोर्नपुंसकात् लुक् दधि मधु त्वत् २३ अतोऽम् अदन्तान्नपुंसकात्परयोः स्वमोरमादेशः फलम् सलम् मध्येकृतेननकतोर्दीर्घः प्राप्नोति २४ अद्ड्डतरादि भ्यः पञ्चभ्यः डतरडतमरतरत्यन्य अन्यतरेति पञ्चभ्यो नपुंसकेभ्यः परयोः स्वमोरद्ड्डादेशो भवति कतरत् कतमत् अन्यत् अन्यतरत् पञ्चभ्य इति किम् नेमम् २५ नेतराच्छन्दसि इ तरशब्दात्परयोः स्वमोश्छन्दसि विषये अद्डादेशो न इतरमिन्द्रमापद्यते छन्दसीति किम् इतरत्कुटुम्बम् २६ युष्मदस्मद्भ्यां ङसोऽश् तव मम २७ ङे प्रथमयोरम् युष्मदस्मद्भ्या मित्यत्रैव द्वचतुर्थ्यां वर्तते ङे इति चतुर्थ्येकवचनस्य प्रथमयोश्च विभक्त्योरमादेशः तुभ्यम् मह्यम् त्वम् अहम् युवाम् आवाम् यूयम् वयम् त्वाम् माम्।

युवाम् २८ शसो नः ताभ्यां परस्य तस्मात् शसो नः पुंसि त्वेव सिद्धे विशिष्टार्थं वचः अलिङ्गे तु युष्मदस्मदी युष्मान् अस्मान् भ्यसोभ्यम् युष्मभ्यम् अस्मभ्यं दीयते २९ पञ्चम्या अत् अभ्यापरः

लोपः आत्मनेपदेषु धर्मो धातः यत्र येन मितिच तस्मात् तत्र तत्पणाङ्क्ष इदन्तो मसि सोमसु [illegible] त्या यादयश्च आङ्मेरहृक अद्वतीरह षत्वणनामान्स्रीतेरूचि आमिसर्वनाम्नः स्मै

ग्र॰ टी
स॰
१८
17

स्वपञ्चम्याभ्यसोऽभ्यम् स्यात् युष्मत् अस्मत् एकवचनस्य च आम्भ्यां परस्य षष्ठ्येकवचनस्याऽदादेशः तव मम सामआकम् भाविनः स्वटो निर्दृष्टर्थं ससङ्कं निर्देशः आम्भ्यां परस्य साम आक ॰
मित्यादेशः युष्माकम् अस्माकम् दीर्घोच्चारणं सवर्णदीर्घार्थम् अकमिति स त्वनोगुणशतिपरस्य स्यात् यद् आन्तेऽत्मनः आदन्ताद्धातोः परस्य णल औ आदेशः स्यात् पपौ ददौ २४ तयो॰
स्तानजशिष्यध्यत स्याम् लोजादेशयोस्तयोराशिषार्थेऽतानङादेशो वा स्यात् जीवतु जीवतात् ङित्करणं गुणवृद्धिनिषेधार्थं तेन स्थानिवत्त्वनिमित्तकं पित्त्वं न ततः सर्वादेशः
ङ स्यान्नार्थत्वात् २५ विदेःशतुर्वसुः ज्ञानार्थविदेः परस्य शतुर्वसुरादेशः विद्वान् केचिदन्यतरस्यामित्यनुवर्तयन्ति तेन विदन् विद्वान् २६ समासेनञ्पूर्वे क्त्वोल्यप् अनञ्पूर्वे समा
से क्त्वादत्यस्य ल्यबादेशः प्रकृत्य प्रणम्य समासे किम् कृत्वा अनञ्पूर्वे किम् अकृत्वा २७ क्त्वापि छन्दसि अनञ्पूर्वे समासे छन्दसि क्त्वाऽस्य स क्त्वाऽपि ना ल्यबपि भवति कृष्णं वासो यज
मानं परिधापयित्वा प्रत्यञ्चमर्कं प्रत्यर्पयित्वा क्वचिल्ल्यबपि उद्धृत्य जुहोति असमासेऽपि क्वचिल्ल्यप् छन्दसि अर्च्य देवान् छन्दोधिकारश्चाज्जसेरसुगिति यावत् २८ सुपांसुलुक्पूर्व
सवर्णाच्छेयाडाड्याजालः छन्दसि विषये सुपांस्थाने सुलुक्पूर्वसवर्णआआत्शेयाडाड्यायाजालः एते आदेशा भवन्ति यथा सु ऋजवः सन्तु पन्थाः पन्था इति प्राप्ते सुपांस्थाने सु ॰
परमे व्योमन् धरिदलितस्याः दक्षिणस्यामिति प्राप्ते एवं तिङां तिङः सुपा यतन्ति तदन्नीति प्राप्ते लुक् आर्द्रे चर्मन् आर्द्रे चर्मणीति प्राप्ते हविर्धाने यत्सुन्वन्ति तत्सामधेनीरित्यादिः
यस्मिन्नितस्मिन्निति प्राप्ते पूर्वसवर्णः धीती मती धीत्या मत्येति प्राप्ते आ उभा यन्तारा उभौ यन्तारौ इति प्राप्ते आत् नतात् ब्राह्मणात् नि द्वामि नान्ता ब्राह्मणानिति प्राप्ते शे अस्मे इन्द्रा
बृहस्पती वयमिति प्राप्ते या साधुया साध्विति प्राप्ते उरुया धृष्णुया उरुणा धृष्णुना डा नाभा पृथिव्याम् नाभाविति प्राप्ते ड्या अनुष्टुभ्या वावयतात् अनुष्टुभेति प्राप्ते याच् साधुया साधि
ति प्राप्ते आल् वसन्ताय जेत वसन्ते इति प्राप्ते ३९ अमो मश् अमिति मिबादेशोऽमस्तेन वधीं हर्त्रं कर्मीद्वंत्रः सप्रशान्ताम् अवधिषम् अक्रमिषमिति प्राप्ते ४० लोपस्त आत्मनेपदेषु आ
तित्स्य लोपश्छन्दसि देवा अदुह्र अदुहतेति प्राप्ते दक्षिणतःशये शेते इति प्राप्ते अपीत्यधिकारात्क्वचिन्न आत्मानमाहतं कुरुते आत्मने इति किम् उत्सं दुहन्ति कलशाम् ४१ ध्वमो
ध्वात् छन्दसि ध्वमस्य ध्वादेशः अन्तरेवोष्माणं वारयध्वात् वारयध्वमिति प्राप्ते ४२ यजध्वैनमिति च यजध्वमित्यस्य एनमि परतो मलोपो वस्य यादेशो निपात्यते यजध्वैनं प्रियमे
धाः यजध्वमिति प्राप्ते ४३ तस्य तात् छन्दसि तस्य तादङ्वति गात्रं गात्रमस्यानूनं कृणुतात् कृणुतेति प्राप्ते पवतात् पवत तप्तनप्तन नप्तनाश्च तस्य स्थाने तपादयश्चादेशाः स्यु
शृणोत ग्रावाणः शृणुत तत संवरत्रादधातन धत्तेति प्राप्ते तनप् जुजुष्टन जुषतेति प्राप्ते तन यदिष्ठन यदिच्छतेति प्राप्ते धन पिकरणमङितार्थम् ४५ इदन्तो मसि छन्दसि मस इद
न्तागमः स्यात् नमो भरन्त एमसि त्वं एवं त्वा दीपयामसि दीपयाम इति प्राप्ते नया रात्रिं वसामसि वसाम इति प्राप्ते ४६ क्त्वो यक् आगमः दत्वाय सविता पयः दत्त्वेति प्राप्ते ।
इष्ट्वीनमिति च क्त्वान्तयजेरीनमादेशो निपात्यते इष्ट्वीनं देवान् इष्ट्वेति प्राप्ते पीत्वीनं सोमं पीत्वेति प्राप्ते ४८ स्नात्व्यादयश्च स्नात्वीत्येवमादयो निपात्यन्ते स्नात्वी मलादिव
स्नात्वेति प्राप्ते पीत्वी सोमस्य पीत्वा ४९ आज्जसेरसुक् अवर्णान्ताज्जसेरसुगागमः पितरः सोम्यासः अश्वत्तीर वृषलवणा नामात्मनीतो वापि छन्दसीति निरुक्तम् प
था मात्मनी ति विषये वा विपरतोऽसुगागमः अस्य स्यति वउवा तीरस्य तर्भः इषस्य तिगोः लवणास्यमङ्कः आत्मनीनाविति किम् अध्वीयनीत्यादि ५१ आमि सर्वनाम्नः सुट् आदि

ह्रस्वनद्यापो नुट् षट्चतुर्भ्यश्च श्रीग्रामण्योश्छन्दसि गोः पादान्ते इदितो नुम्धातोः शे मुचादीनाम् मस्जिनशोर्झलि रधिजभोरचि नेट्यलिटि रधेः रभेरशब्लिटोः लभेश्च आङो यि उपात्प्रशंसायाम् उपसर्गात्खल्घञोः न सुदुर्भ्यां केवलाभ्याम्
विभाषा चिण्णमुलोः उगिदचां सर्वनामस्थानेऽधातोः युजेरसमासे नपुंसकस्य झलचः इकोऽचि विभक्तौ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः छन्दस्यपि दृश्यते ई च द्विवचने [illegible] वा नपुंसकस्य

निवर्त्तते सर्वनाम्न इति पञ्चमीनिर्देशादामीति सप्तमी षष्ठ्यर्थे तत्करणमुत्तरार्थम् अवर्णान्तादङ्गात्परस्य सर्वनाम्नः परस्यामः सुडागमः सर्वेषाम् केषाम् ५२ त्रेस्त्रयः आमि त्रयाणा
म् ५३ ह्रस्वनद्यापो नुट् ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः रामाणाम् हरीणाम् भानूनाम् गौरीणाम् वधूनाम् रमाणाम् ५४ षट्चतुर्भ्यश्च षट्संज्ञेभ्यश्चतुरश्च पर
स्यामो नुट् पञ्चानाम् षण्णाम् चतुर्णाम् ५५ श्रीग्रामण्योश्छन्दसि अनयोरामश्छन्दसि नुट् श्रीणाम् ग्रामणीनाम् ५६ गोः पादान्ते पादस्यान्तादः गोशब्दात्परस्यामो नुट् पादान्ते
सप्ततिंशद्गोनाम् सर्वविधयश्छन्दसि विकल्पन्ते इति क्वचिन्न गोपतिं गवाम् ५७ इदितो नुम्धातोः वन्दिता ५८ शे मुचादीनाम् शे प्रत्यये परतो मुचादीनां सप्तानां नुमाग
मः मुञ्चति लुम्पति विन्दतीत्यादि ५९ मस्जिनशोर्झलि झलादौ प्रत्यये परे मस्जिनशोर्धात्वोर्नुम् मङ्क्ता नंष्टुम् झलीति किम् मज्जनम् नशनम् ६० रधिजभोरचि अजादौ प्र
त्यये परे रधिजभोर्धात्वोर्नुम् रन्धयति रन्धकः जम्भी जजम्भ जम्भः अचि किम् रद्धा जब्धा ६१ नेट्यलिटि रधेः इडादावलिटि प्रत्यये परे रधेर्नुम्न रधितुम् रधिता इटि किम् रन्धी
अलिटीति किम् ररन्धिव ६२ रभेरशब्लिटोः रभेरङ्गस्य नुम् शब्लिड्वर्जितेऽजादौ प्रत्यये परे रम्भयति रम्भकः आरम्भः अशब्लिटोः किम् आरभते आरेभे अचीत्येव आरब्धा ६३ लभेश्च
अशब्लिटोरित्यनुवर्त्तते शब्लिड्वर्जितेऽजादौ प्रत्यये लभेरङ्गस्य नुम् लम्भयति लम्भकः लम्भी शपि लभते लिटि लेभे अचीत्येव लब्धा ६४ आङो यि आङः परस्य लभेर्यादौ प्रत्यये नुम्।
आलम्भ्यः पशुः आङः किम् लभ्यः यीति किम् आलब्धा उपात्प्रशंसायाम् उपपूर्वस्य लभेः प्रशंसार्थे यादौ परतो नुम् उपलम्भ्या विद्या उपलम्भ्यानि विज्ञानानि प्रशंसायां किम् उपल
भ्यमस्मात् [illegible] किञ्चन ६६ उपसर्गात्खल्घञोः सोपसर्गलभेः खल्घञोः परतो नुम् ईषत्प्रलम्भः सुप्रलम्भः प्रलम्भः उपसर्गादिति किम् ईषल्लभः लाभः ६७ न सुदुर्भ्यां के
वलाभ्याम् अन्योपसर्गहीनाभ्यां सुदुर्भ्यां परस्य लभेः खल्घञोर्नुम्न सुलभः दुर्लभः सुलाभः दुर्लाभः केवलाभ्यां किम् सुप्रलम्भः दुष्प्रलम्भः ६८ विभाषा चिण्णमुलोः चिणि
णमुलि च लभेर्वा नुम् अलम्भि अलाभि लम्भंलम्भम् लाभंलाभम् ६९ उगिदचां सर्वनामस्थानेऽधातोः धातुवर्जितानामुगितामञ्चतेश्च नकारान्तानां सर्वनामस्थाने प
रे नुम् भवतु भवान् भवन्तौ ईयसुन् श्रेयान् श्रेयांसौ शतृ पचन् पचन्तौ अञ्चतेः प्राङ् प्राञ्चौ उगिदचामिति किम् दृषद् दृषदौ सर्वनामस्थाने किम् भवतः [illegible] अञ्चतिग्रहणं
नियमार्थम् उगितश्चेद्धातोः कार्यं तर्ह्यञ्चतेरेव नान्यस्य उखास्रत् पर्णध्वत् ७० युजेरसमासे असमासे युजेर्नुम् युङ् युञ्जौ असमासे किम् अश्वयुक् अश्वयुजौ ७१ नपुंसकस्य झ
लचः झलन्तस्याजन्तस्य च नपुंसकस्य सर्वनामस्थाने नुम् उदश्विन्ति शकृन्ति पयांसि धनानि दधीनि नपुंसकस्येति किम् अग्निचितौ झलच इति किम् बहुपुरि चत्वारि ७२ इको
ऽचि विभक्तौ इगन्तस्य नपुंसकस्याजादौ विभक्तौ परतो नुम् दधिनी इकः किम् फले [illegible] ७३ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य तृतीयादिष्वजादिषु विभक्तिषु इगन्तं
क्लीबं भाषितपुंस्कं गालवमते पुंवद्भवति यथा पुंसि न नुम् ह्रस्वो [illegible] ग्रामणी द्विजः ग्रामणि तत्कुलम् तेन ग्रामण्या ग्रामणिना भाषितपुंस्कं किम् दध्ने मधुने इकारत्येव
सोमपाः सः सोमपं तत् तेन सोमपेन अचीत्येव ग्रामणिभ्याम् ७४ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः एषामन्तस्यानङादेशः तृतीयादिष्वजादिषु परतः स चोदात्तः अस्थ्ना दध्ना
सक्थ्ना अक्ष्णा छन्दस्यपि दृश्यते अस्थ्यादीनामनङ् [illegible] यथा भद्रं [illegible] अस्थभिः [illegible] अक्षण्वता लाङ्गलेन [illegible] ७५ ई च द्विवचने द्विवच

अस्थ्यन्तं

आच्छीनद्योर्नुम् ७८. शप्श्यनोर्नित्यम् सावनडुहः दृकस्ववस्स्वतवसां छन्दसि दिव औत् पथिमथ्यृभुक्षामात् इतोऽत्सर्वनामस्थाने थो न्थः भस्य टेर्लोपः पुंसोऽसुङ् गोतो णित् णलुत्तमो वा सख्युरसंबुद्धौ अनङ् सौ ऋदुशनस्पुरुदंसोऽनेहसां च
तृज्वत्क्रोष्टुः स्त्रियां च विभाषा तृतीयादिष्वचि चतुरनडुहोरामुदात्तः अम् संबुद्धौ ऋत इद्धातोः ५ उपधायाश्च उदोष्ठ्यपूर्वस्य बहुलं छन्दसि ॥ युवोरनाकौ लोपस्तोरपि ... उपधायाश्च इयः । सप्तमाध्यायस्य प्रथमः पादः १

प्रश्न·स· १८ 16

नेपरम् छन्दसि अस्थ्यादीनामीकारादेशः अक्षीतेश्च पिङ्गले अक्षीभ्यां नेनासिकाभ्याम् ७७ नाभ्यस्ताच्छतुः अभ्यस्तादङ्गात्परस्य शतुर्नुम् दधत् दधतौ दधत् जक्षतो जाग्रतः ७८ वान१ सिचि वृद्धिः परस्मैपदेषु अतो ल्रान्तस्य वदव्रजहलन्तस्याचः
पुंसकस्य अभ्यस्तादङ्गात्परो यः शता तदन्तस्य नपुंसकस्य नुम्वा न ददति ददन्ति वा कुलानि ७९ आच्छीनद्योर्नुम् अवर्णान्तादङ्गात्परो यः शता तदवयवस्य नुमागमो न भवति वा शीनद्योः
परतः तुदती तुदन्ती वा कुले स्त्रीवा याती यान्ती वा कुले स्त्रीवा आदिति किम् कुर्वती ८० शप्श्यनोर्नित्यम् शप्श्यनोरवर्णान्तस्य शतुर्नित्यं नुम् शीनद्योः पचन्ती दीव्यन्ती ८१ सावनडुहः
सौ परेऽनडुहो नुम् स्यात् नुम् अनड्वान् ८२ दृकस्ववस्स्वतवसां छन्दसि एषां छन्दसि सौ नुम् मादृङ् तादृङ् स्ववान् स्वतवान् ८३ दिव औत् दिव इत्येतस्य प्रातिपदिकस्य सौ परे औ इत्ययमादेशः द्यौः
८४ पथिमथ्यृभुक्षामात् पथिन् मथिन् ऋभुक्षिन् इत्येतेषां सौ परे आ इत्यादेशः पन्थाः मन्थाः ऋभुक्षाः ८५ इतोऽत्सर्वनामस्थाने पथ्यादीनामितोऽत्सर्वनामस्थाने पन्थाः पन्थानौ मन्थानः ऋभु
क्षाणम् ८६ थो न्थः पथिमथोः सर्वनामस्थाने न्थादेशः पन्थाः मन्थाः ८७ भस्य टेर्लोपः पथ्यादीनां भसंज्ञानां टेर्लोपः पथः मथः ऋभुक्षः ८८ पुंसोऽसुङ् पुंसशब्दस्य सर्वनामस्थानेऽसुङादेशः
स्यात् पुमान् सर्वनामस्थाने इत्येव पुंसः पश्य ८९ गोतो णित् गोशब्दात्परं सर्वनामस्थानं णिद्वत्स्यात् गौः गावौ तपरकरणं किम् चित्रगुः केचित्तु गोतो णिदिति पठन्ति तेन द्यौः द्यावौ ९० णल१
उत्तमो वा णिद्वत् अहं चकार चकर वा ९१ सख्युरसंबुद्धौ सखिशब्दात्परं सर्वनामस्थानं णिद्वद्भवति न संबुद्धौ सखा सखायौ हे सखे ९२ अनङ् सौ सख्युरनङादेशः सावसंबुद्धौ सखा हे स
खे ९३ ऋदुशनस्पुरुदंसोऽनेहसां च ऋदन्तानामुशनस्पुरुदंसोऽनेहसां चासंबुद्धौ सावनङादेशः कर्ता माता उशना पुरुदंसा अनेहा संबुद्धौ तु हे कर्तः हे मातः हे उशनः हे पुरुदंसः हे अ
नेहः ९४ तृज्वत्क्रोष्टुः क्रोष्टुस्तृन्नन्तः संज्ञाशब्दः सर्वनामस्थाने तृज्वत्स्यात् तृजन्तस्य यद्रूपं स्यादित्यर्थः क्रोष्टा क्रोष्टारौ सर्वनामस्थाने इत्येव क्रोष्टून् असंबुद्धावित्येव किम् हे क्रोष्टो ।
९५ स्त्रियां च क्रोष्टुशब्दः स्त्रियां तृज्वद्भवति असर्वनामस्थानार्थमारम्भः क्रोष्ट्री क्रोष्ट्रीभिः ९६ विभाषा तृतीयादिष्वचि तृतीयादिष्वजादिषु परतः क्रोष्टुर्वा तृज्वत् क्रोष्ट्रा क्रोष्टुना ।
तृतीयादिषु किम् क्रोष्टून् अचीति किम् क्रोष्टुभिः ९७ चतुरनडुहोरामुदात्तः अनयोः सर्वनामस्थाने आमागमः स चोदात्तः अनड्वान् अनड्वाहौ चत्वारः तदन्तविधिना प्रियचत्वाः प्रिय१
चत्वारौ प्रियानड्वान् ९८ अम् संबुद्धौ संबोधने च तयोरनडुहोरमागमः हे प्रियचत्वः हे प्रियानड्वन् ९९ ऋत इद्धातोः ऋदन्तस्य धातोरङ्गस्य इकारादेशः किरति गिरति आस्तीर्णम् ला
क्षणिकस्य ग्रहणमिष्यते चिकीर्षते १०० उपधायाश्च उपधायाः ऋकारस्य इकारादेशः कीर्तयति १ उदोष्ठ्यपूर्वस्य ओष्ठ्यवर्णः पूर्वो यस्मात् ऋकारात्तदन्तस्य धातोरङ्गस्योकारादेशः पिपु१
र्तिः बुभूर्षति मुमूर्षति गुणवृद्धी तु विप्रतिषेधेन आस्तरणम् आस्तारकः २ बहुलं छन्दसि छन्दसि एवौ बहुलम् उदोष्ठ्यपूर्वस्येत्युक्तमनोष्ठ्यपूर्वस्यापि यथा स्यात् मित्रावरुणौ त१
तुरिः उदोष्ठ्यपूर्वस्यापि न पप्रितमम् ३ ॥ इति श्री सूत्रार्थसंग्रहे सप्तमाध्यायस्य प्रथमः पादः १ ॥ सिचि वृद्धिः परस्मैपदेषु परस्मैपदेषु सिचि परतः इगन्तस्य वृद्धिर्भवति अचैषीत् ।
अलावीत् अकार्षीत् परस्मैपदेष्विति किम् अच्योष्ट अतो ल्रान्तस्य अतः समीपौ यौ लकाररेफौ तदन्तस्याङ्गस्यातः स्थाने वृद्धिः सिचि अक्षारीत् अज्वालीत् अतो हलादेर्विकल्पापवादः अ१
तः किं न्यखोरीत् न्यमीलीत् ल्रान्तस्य किम् माभवानवीत् माभवानटीत् अन्त्यग्रहणं किम् अवल्हीत् अबर्हीत् अत्र यौ रेफलकारौ वकारहकाराभ्यां व्यवहितौ न तावतः समीपौ स्तः यद्यलोऽन्तः समीपौ न
तदन्तमङ्गम् २ वदव्रजहलन्तस्याचः वदिव्रज्योर्हलन्तानां चाङ्गानामचः स्थाने वृद्धिः स्यात् सिचि अवादीत् अव्राजीत् विकल्पबाधनार्थं वदिव्रजिग्रहणम् हलन्तानाम् अपाक्षीत् अभै १२

नेटि ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ऊर्णोतेर्विभाषा अतो हलादेर्लघोः नेड्वशि कृति तितुत्रतथसिसुसरकसेषु च एकाच उपदेशेऽनुदात्तात् श्र्युकः किति सनि ग्रहगुहोश्च कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि श्वीदितो निष्ठायाम् यस्य विभाष
इदितो वा आदितश्च विभाषा भावादिकर्मणोः क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु धृषिशसी वैयात्ये दृढः स्थूलबलयोः प्रभौ परिवृढः कृच्छ्रगहनयोः कषः घुषिरविशब्दने अर्देः संनि॰

त्सीत् हलग्रहणं हल्समुदायपरिग्रहार्थम् अरान्तीत् असान्तीत् ४ नेटि इडादौ सिचि वृद्धिर्न अरेवीत् हलन्तस्येत्येव अलावीत् ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्
ह्मयान्तानां धातूनां क्षणश्वसजागृणिश्व्येदितां च इडादौ सिचि वृद्धिर्न अग्रहीत् अस्यमीत् अव्ययीत् अक्षणीत् अश्वसीत् अजागरीत् औनयीत् अश्वयीत् अ
रगीत् अलगीत् ५ ऊर्णोतेर्विभाषा इडादौ सिचि परे ऊर्णोतेर्वा वृद्धिः प्रौर्णावीत् प्रौर्णवीत् ६ अतो हलादेर्लघोः हलादेरतः स्थलघोरकारस्य इडादौ सिचि परे वा वृद्धिः अकाणीत्
अकणीत् अतः किम् अदेवीत् हलादेः किम् मा भवानटीत् लघोरिति किम् अरक्षीत् इडीत्येव अपाक्षीत् ७ नेड्वशि कृति वशादौ कृति प्रत्यये परे इडागमो न ईशिता ई
शितुम् ईश्वरः दीप्रम् भस्म याज्ञा कृतीति किम् रुदिवः ८ तितुत्रतथसिसुसरकसेषु च एषु कृत्प्रत्ययेषु परतो नेट् तिः तन्तिः दीप्तिः तुः सक्तुः तन्तुः त्रः तन्त्रम् पत्त्रम् तः हस्तः लो
तः थः कुष्ठम् सिः कुक्षिः सुः इक्षुः सरः अक्षरम् कः शल्कः सः वत्सः उणादिका इमे ९ एकाच उपदेशेऽनुदात्तात् उपदेशे धातुपाठादौ य एकाजनुदात्तस्तस्माद्विहितस्य
वलादेरार्धधातुकस्येट् न दाता चेता नेता यन्ता द्रष्टा एकाच इति किम् दरिद्रिता अनुदात्तात्किम् भविष्यति यविष्यति १० श्र्युकः किति श्रिञ एकाच उगन्तानां च किति परे इट् न।
श्रितः श्रित्वा युतः लूनः वृतः तीर्णः श्र्युकः किम् विदितः किति किम् श्रयिता श्रयितुम् ११ सनि ग्रहगुहोश्च ग्रहगुहोरुगन्तानां च सनि परे नेट् जिघृक्षति जुघुक्षति बुभू
षति चिकीर्षति श्रिस्वृयूर्णुभरतीति विकल्पविधानात् ... ग्रहेर्निष्प्रयोजनः ग्रहेरिट् दीर्घादिकल्पः १२ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि एभ्यो लिटि नेट् चकृम ससृम बभृव व
वृमहे तुष्टुव दुद्रुम सुस्रुव शुश्रुम सिद्धे सत्यारम्भो नियमार्थः कादिष्वेव लिटि इडागमो नान्यत्रेति नियमार्थं विभिदिव १३ श्वीदितो निष्ठायाम् श्वयतेरीदितश्च निष्ठाया नेट् शूनः ओलजी लग्नः।
दीपी दीप्तः १४ यस्य विभाषा यस्य क्वापि विभाषोक्ता तस्य निष्ठायामिण्न स्वरतिसूतिसूयतिधूञूदितो वेति विकल्पितस्य स्वृतः सूनः धूतः गुहू गूढः इदितो वा वृहः १५ आदितश्च आदि
तो धातोर्निष्ठाया इण्न ञिमिदा मिन्नः क्ष्विदा विभाषा भावादिकर्मणोः भावे आदिकर्मणि चादितो धातोर्निष्ठाया इड्वा मिन्नं मेदितं तानेन प्रमिन्नः प्रमेदितो वा १७ क्षुब्धस्वान्त
ध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु एतानि निपात्यन्ते क्षुब्धो मन्थः क्षुभितोऽन्यः स्वान्तं मनः।
स्वनितोऽन्यः ध्वान्तं तमः ध्वनितोऽन्यः लग्नं सक्तम् लगितमन्यत् म्लिष्टम् अविस्पष्टम् म्लेच्छितमन्यत् विरिब्धः स्वरः विरेभितमन्यत् फाण्टमनायाससाध्यम् औषधम् फाणितम
न्यत् बाढम् अतिशयितं वाहितमन्यत् १८ धृषिशसी वैयात्ये वैयात्यमविनीतत्वं तत्रैवार्थे धृषिशसी निष्ठायामनिटौ स्तः धृष्टः शस्तः वैयात्ये किम् धर्षितः विशसितः १९ दृढः स्थू
लबलयोः स्थूले बलवति च वाच्ये दृढो निपात्यते दृढः दृंहेः क्तः इडभावः नहयोर्लोपः परस्य ढत्वम् दृंहितमन्यत् २० प्रभौ परिवृढः प्रभौ वाच्ये परिवृढो निपातनीयः वृंहेः क्तादि
प्राग्वत् परिवृढः स्वामी परिवृंहितमन्यत् २१ कृच्छ्रगहनयोः कषः अनयोरर्थयोः कषेर्निष्ठायामिण्न कष्टोऽग्निः कष्टं व्याकरणम् अन्यत्र कषितं कनकम् घुषिरविशब्दने विशब्द
नं प्रतिज्ञानं तद्भिन्नेऽर्थे घुषिर निष्ठायामनिट् घुष्टा रज्जुः अन्यत्रावघुषितं वचः २२ अर्देः संनिविभ्यः एभ्यः परस्यार्देर्निष्ठायामिण्न समर्णः न्यर्णः व्यर्णः एभ्यः किम् अर्दितः २३ अभे

अभेश्चाविदूर्ये णेरध्ययने वृत्तम् वा दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः रुष्यमत्वरसंघुषास्वनाम् हृषेर्लोमसु अपचितश्च ह्रुह्वरेश्छन्दसि अपरिह्वृताश्च सोमे ह्वरितः ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्तविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरुत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च आर्धधातुकस्येड्वलादेः स्नुक्रमोरनात्मनेपदनिमित्ते ग्रहोऽलिटि दीर्घः वृतो वा न लिङि सिचि च परस्मैपदेषु ३६ इट् सनि वा

अष्टा·स·
७९
19

अभेश्चाविदूर्ये विदूर्यं विप्रकृष्टं ततोऽन्यद विदूरं तत्र अविदूर्ये नैकट्ये तत्रार्थे ऽभेर्निष्ठायामिडभावो निपात्यते अभ्यर्णा सेना अभ्यर्दितम् अन्यत्र पीडितम् २५ णेरध्ययने वृत्तम् अध्ययने विषये ण्यन्तस्य वृतेर्वृत्तमिति निपात्यते निष्ठायामिडभावो णिलुक् च निपात्यते वर्तितम् अन्यत्र वा दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः एषां ण्यन्तानां धातूनां निष्ठायाम् एते वा निपात्यन्ते अनिट्त्वं णिलुक् च पक्षे दमितः शमितः पूरितः दासितः स्पाशितः छादितः ज्ञापितः २७ रुष्यमत्वरसंघुषास्वनाम् एषां निष्ठायामिड् वा रुष्टः रुषितः अभ्यान्तः अभ्यमितः तूर्णः त्वरितः संघुष्टः संघुषितः आस्वान्तः आस्वनितः २८ हृषेर्लोमसु लोमसु वाच्येषु हृषेर्निष्ठायामिड् वा हृष्टं हृषितं वा लोमभिः लोमस्विति किम् हृष्टो देवदत्तः अपचितश्च अपपूर्वस्य चायतेर्निष्ठायामयं निपातो वा अनिट्त्वं चिभावश्च अपचितोऽनेन गुरुः अपचायितो वा ३० ह्रुह्वरेश्छन्दसि ह्वरेर्धातोश्छन्दसि निष्ठायां ह्रु आदेशः अह्रुतमसि हविर्धानम् छन्दसि किम् ह्वृतम् ३१ अपरिह्वृताश्च छन्दसीदमपि निपात्यते पूर्वोक्तादेशाभावः अपरिह्वृताः सनुयाम वाजम् ३२ सोमे ह्वरितः सोमे वाच्ये ह्वरतेर्निष्ठायामिड् गुणो निपात्यते मा नः सोमो ह्वरितो विह्वरस्त्वम् ३३ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्तविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरुत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च छन्दस्येते निपात्यन्ते विकस्त इत्येकं पदम् अथैतत्प्रति निपातनं पदम् ग्रसुस्कम्भुस्तम्भूनाम् उत्तभेश्चासु दितां निष्ठायामिण् निपात्यते ग्रसितः स्कभितः स्तभितः उत्तभितः उत्पूर्वनिपातना च्च अन्योपसर्गपूर्वो न भवति भाषायां तु ग्रस्तः विष्कब्धः विष्टब्धः उत्तब्धः चतेर्विसर्वक सेरनिष्ठायामनिट्त्वं निपात्यते चत्ता वियुत विकस्तं हृदयम् भाषायां तु चतिता विकसितम् विश शसेः शंसेः शासेश्च तृचीडभावो निपात्यते विशस्ता शंस्ता प्रशास्ता भाषायां तु विशसिता शंसिता प्रशासिता तरतेर्वृङ्वृञोश्च तृचि उङ्ऊङ्ऊप्तागमो निपात्येते तरुता तरूता वरुता वरूता भाषायां तरितातरीता वरितावरीता वरुत्रीः वरुत्रिणश्च निपातितः तत एव ङीपि सति वरुत्रीशब्दः जसि पूर्वसवर्णोच्चारणं प्रयोगदर्शनार्थम् उत्पूर्वज्वलतेः क्षरक्षमि वमीनां च तिपि शपश्च श्लादेशः शपो लुक् इडागमो निपात्यते अग्निरुज्ज्वलिति क्षरिति क्षमिति वमिति अभ्यमितीति भाषायां ज्वलति क्षरति क्षमति वमति अभ्यमति इति करणं प्रदर्शनार्थम् तेन कचिदीकारोऽपि चित्तमभ्यमीति वरुणं इत्यपि वेदे पठ्यते आर्धधातुकस्येड्वलादेः अस्येव प्रागपकर्षो निरूपितः चलिता चलितव्यम् आर्धधातुकस्येति किम् आस्ते वस्ते वलादेरिति किम् लव्यं लवनीयम् अत्र ह्नोः सत्यां पुनरिड्ग्रहणं प्रतिषेधनिवृत्त्यर्थम् स्नुक्रमोरनात्मनेपदनिमित्ते स्नुक्रमोर्वलादेरार्धधातुकस्येडागमः स्यात् आत्मनेपदनिमित्तं विना भावकर्मकर्मकर्तृकर्मव्यतिहारा आत्मनेपदविषयाः तत्रनेट् क्रमिता क्रमितुम् क्रमितव्यम् अनात्मनेपद इति किम् प्रस्नोषीष्ट प्रक्रंस्यते ३६ ग्रहोऽलिटि दीर्घः ग्रहुत्तरस्येटो दीर्घो भव त्यलिटि ग्रहीता ग्रहीतुम् ग्रहीतव्यम् अलिटीति किम् जगृहिव प्रकृतस्येटो दीर्घत्वमिटं न विदधाति ग्राहिता ग्राहिष्यते ३७ वृतो वा वृङ्वृञ्भ्यामृकारान्तेभ्यश्च परस्येटो वा दीर्घः वरि ता वरीता तरिता तरीता वृत इति किम् करिष्यति ३८ न लिङि वृतः परस्येटो न दीर्घो लिङि वरिषीष्ट तरिषीष्ट ३९ सिचि च परस्मैपदेषु वृतः परस्येटो न दीर्घः सिचि परे अवारिष्टाम् अता रिषुः आतितत् अवरिष्ट अवरीष्ट अतरिष्ट अतरीष्ट ४० इट् सनि वा वृतः इतिपञ्चम्यन्तानुवृत्तेः सनीति सप्तम्या विपरिणम्यते वृतः परस्य सनो वेट् तुवर्षति विवरिषति विवरीषति तितीर्षति

लिङ्सिचोरात्मनेपदेषु ऋतश्च संयोगादेः स्वरतिसूतिसूयतिधूञूदितो वा रधादिभ्यश्च निरःकुषः इण्निष्ठायाम् तीषसहलुभरुषरिषः सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् क्लिशः क्त्वानिष्ठयोः पूङश्च वसतिक्षुधोरिट् अञ्चेः पूजायाम् लुभो
विमोहने जॄव्रश्च्योः क्त्वि उदितो वा सेऽसिचि कृतचृतछृदतृदनृतः गमेरिट्परस्मैपदेषु न वृद्भ्यश्चतुर्भ्यः

तितरिषति तितरीषति ४१ लिङ्सिचोरात्मनेपदेषु वृङो लिङ्सिचोर्वातिवेट् वृषीष्ट वरिषीष्ट अवृत अवरिष्ट आस्तृषीष्ट आस्तरिषीष्ट आस्तीर्षीष्ट आस्तरिषीष्ट आस्तरीषीष्ट आत्मनेपदेष्विति किम् अवारिषाम् ४२ ऋतश्च संयोगादेः संयोगादेरृदन्ताद्धातोर्लिङ्सिचोर्वा तिवेट् स्मृषीष्ट स्मरिषीष्ट अध्वृषाताम् अध्वरिषाताम् ऋत इति किम् च्योषीष्ट अच्योष्ट संयोगादेरिति किम् कृषीष्ट अकृषत पत्व अधार्षीत ४३ स्वरतिसूतिसूयतिधूञूदितो वा स्वरतधूञ ऊदितश्च परस्य वलादेरार्धधातुकस्येड्वा गमः स्वर्ता स्वरिता प्रसोता प्रसविता सोता सविता धोता धविता गाढा गाहिता गुपू गोप्ता गोपिता अनूदित्त्वेऽपि न वा ग्रहणं लिङ्सिचोर्निवृत्त्यर्थम् सूतिसूयती तिविकरणनिर्देशः षूप्रेरणार्थस्य निवृत्त्यर्थः धूञिति सानुबन्धनिर्देशो धूविधूनने इत्यस्य निवृत्त्यर्थः ४४ रधादिभ्यश्च रधप्रभृतिभ्यः परस्य वलादेरार्धधातुकस्येड्वा गमो वा रद्धा रधिता नेष्टा नेशिता एवं तृपदृपद्रुहमुहष्णुहष्णिह रधादयः उदाहृताः ४५ निरःकुषः निरः परात्कुषः परस्य वलादेरार्धधातुकस्येड्वा निःकोष्टा निःकोषिता ४६ इण्निष्ठायाम् निरःकुषो निष्ठायां नित्यमिट् निःकुषितः यस्य विभाषेत्यस्यापवादोऽयम् अत एव नित्यतार्थमिदं इह ग्रहणम् अन्यथा विकल्प एव स्यादग्रे तु विकल्प एव ४७ तीषसहलुभरुषरिषः तादावार्धधातुके एषादिभ्यो वेट् एष्टा एषिता सोढा सहिता लोब्धा लोभिता रोष्टा रोषिता रेष्टा रेषिता तीति किम् एषिष्यते सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् इवन्तानामृधादीनां च सनि वेट् दिदेविषति दुद्यूषति अर्दिधिषति ईर्त्सति बिभ्रज्जिषति बिभ्रक्षति दिदम्भिषति धिप्सति शिश्रयिषति शिश्रीषति सिस्वरिषति सुस्वूर्षति यियविषति युयूषति ऊर्णुनविषति ऊर्णुनूषति बिभरिषति बुभूर्षति जिज्ञपयिषति ज्ञीप्सति सिसनिषति सिषासति क्लिशः क्त्वानिष्ठयोः ४९ क्लिशधातोः क्त्वानिष्ठयोरिड्वा क्लिशित्वा क्लिष्ट्वा क्लिशितः क्लिष्टः क्लिश्यत्यस्य वेट्त्वे न यस्य विभाषेति निष्ठायां निषेधः क्लिश्यत्यस्य तु नित्यमिट् इतीदं सूत्रमारब्धम् ५० पूङश्च पूङ्धातोश्च क्त्वानिष्ठयोरिड्वा पवित्वा पूत्वा पवितः पूतः श्र्युकः किति इति निषेधप्राप्ते सूत्रम् वसतिक्षुधोरिट् क्त्वानिष्ठयोर्नित्यमिड्ग्रहणं नित्यार्थम् उषितः उषित्वा। क्षुधितः क्षुधित्वा ५२ अञ्चेः पूजायाम् अञ्चतेः पूजार्थे क्त्वानिष्ठयोरिट् अञ्चित्वा जानु जुहोति अञ्चिता अस्य गुरवः उदितो वेति क्त्वि विकल्पेन निष्ठायां निषेधः प्राप्तः पूजायामिति किम् उदक्तमुदकं कूपात् ५३ लुभो विमोहने विमोहनेऽर्थे लुभधातोः क्त्वानिष्ठयोरिट् लुभित्वा लोभित्वा विलुभिताः केशाः क्त्वि तु सहेति वेट्त्वेन निष्ठायां निषेधः प्राप्तः विमोहने किम् लुब्धो वृषभः ५४ जॄव्रश्च्योः क्त्वि इट् जरित्वा जरीत्वा व्रश्चित्वा जॄव्रश्च्योः श्र्युकः किति इति निषेधः प्राप्तः व्रश्चे रूदित्त्वाद्विकल्पः क्त्वाग्रहणं निष्ठानिवृत्त्यर्थः ५५ उदितो वा उदितो धातोः क्त्वाप्रत्यये परे वेट् शान्त्वा शमित्वा श्रान्त्वा श्रमित्वा ५६ सेऽसिचि कृतचृतछृदतृदनृतः अनार्धधातुके सिज्भिन्ने सादौ प्रत्यये कृतादिभ्य परड्वा कर्त्स्यति कर्तिष्यति विचृत्सति विचर्तिषति अच्छर्त्स्यत् अच्छर्दिष्यत् तितृत्सति तितर्दिषति अनर्त्स्यत् अनर्तिष्यत् सेति किम् नर्तिता असिचीति किम् अनर्तीत् ५७ गमेरिट्परस्मैपदेषु सेरस्यापवर्गेते गमेः सादावार्धधातुके परे इडागमः गमिष्यति गमेः किम् चेष्यति इड्ग्रहणं नियमार्थम् परस्मै किम् संगसीष्ट संगंस्यते ५८ न वृद्भ्यश्चतुर्भ्यः वृत

तासि च क्लृपः २ अचस्तास्वत्थल्यनिटो नित्यम् उपदेशेऽत्वतः ऋतो भारद्वाजस्य बभूथाततन्थजगृभ्मववर्थेति निगमे विभाषा सृजिदृशोः इडत्यर्तिव्ययतीनाम् वस्वेकाजाद्घसाम् विभाषा गमहनविदविशाम् सनिं ससनिवांसम् ऋद्धनोः स्ये
अञ्जेः सिचि स्तुसुधूञ्भ्यः परस्मैपदे यमरमनमातां सक् च स्मिपूङ्रञ्ज्वशां सनि किरश्च पञ्चभ्यः रुधादिभ्यः सार्वधातुके ईशः से ईडजनोर्ध्वे च लिङः सलोपोऽनन्त्यस्य

तासेः ८

स्रु॰ धा॰ ४ वृध्भ्यः स्यसनोः परस्मैपदे रादेरार्धधातुकस्येण्नेट्‌ वर्त्स्यति विवृत्सति एवं वृध शृधु स्यन्द स्यन्त्स्यति आतिन वर्तिष्यते अशर्धिषाताम् ५९ तासि च क्लृपः कृपउत्तरस्य तासादेरार्धधातुकस्यापि नेड्
१ कल्प्तास्थः कल्प्स्यति चिक्लृप्सति आतिन कल्पिताःस्थ कल्पिषीष्ट ६० अचस्तास्वत्थल्यनिटो नित्यम् येनचाधातवस्तासौ नित्यानिटस्तेभ्य स्थलितासीव नित्यानिटः स्यः याता ययाथ
२० चेता चिचेथ होता जुहोथ अचः किम् भेत्ता बिभेदिथ तास्वदिति किम् लूना लुलविथ थलि किम् ययिव नित्यं किम् विधोता विधविता विदुधविथ ६१ उपदेशेऽत्वतः उपदेशे
योऽधातुरकारवांस्तासौ नित्यानिट् तस्मात्तासीव थलीट् न पक्ता पपक्थ उपदेशे किम् कर्षा चकर्षिथ तपरकरणं किम् राद्धा रराधिथ तास्वदित्येव जिघत्सति जघसिथ नित्यानिट्
त्येव अञ्जा आञ्जिता आनञ्जिथ ६२ ऋतो भारद्वाजस्य भारद्वाजमते ऋदन्तस्य तासि नित्यानिटस्थलीट् न स्मर्ता सस्मर्थ कर्ता चकर्थ सिद्धे सत्यारम्भो नियमार्थः ऋत एव नान्यस्य
तेन भारद्वाजमते ययिथ येचिथ अर्थात्सर्वस्य तथोर्विकल्पः ६३ बभूथाततन्थजगृभ्मववर्थेति निगमे छन्दस्येते निपात्यन्ते भाषायां तु बभूविथ आतेनिथ जगृहिम ववरिथेति सिद्ध
त्रि ६४ विभाषा सृजिदृशोः अनयोस्थलीड्वा सस्रष्ठ ससर्जिथ ददृष्ठ ददर्शिथ ६५ इडत्यर्तिव्ययतीनाम् एषां थलि नित्यमिट् आरिथ आरिथ विव्ययिथ ६६ वस्वेकाजाद्घसाम् कृतद्वि
त्वानामेकाचामादन्तानां घसेश्च वसाविट् आदिवान् पेचिवान् ययिवान् जक्षिवान् सिद्धे सत्यारम्भो नियमार्थः एषामेव वसाविट् नान्येषामिति बिभिद्वान् बभूवान् ६७ विभाषा
विभाषा गमहनविदविशाम् एषां वसाविड्वा जग्मिवान् जगन्वान् जघ्निवान् जघन्वान् विविदिवान् विविद्वान् विविशिवान् विविश्वान् विदिना साहचर्यात् लाभार्थस्य तौदादिकविदे
ग्रहणं तज्ज्ञानार्थस्य तु नित्यं विविद्वानित्येव ६८ सनिंससनिवांसम् सनिं पूर्वस्य सनोतेः सनतेर्वा सनिंस सनिवांसमिति निपात्यते अञ्जिवान्ते सनिंससनिवांस इडागमस्त्वभ्यासलो
पाभावश्च निपात्यते सनिं ससवांसमित्यन्यत्रैव सनिवांसमित्येव भवति ६९ ऋद्धनोः स्ये ऋदन्तस्य हन्तेश्च स्यस्येडागमः करिष्यति हनिष्यति ७० अञ्जेः सिचि इट् स्यात् आञ्जिषाम् विकल्पापवा
दः सिचि किम् अङ्क्ता अञ्जिता ७१ स्तुसुधूञ्भ्यः परस्मैपदे एभ्यः सिच इट् अस्तावीत् असावीत् अधावीत् आतिन अस्तोष्ट असोष्ट अधोष्ट अधविष्ट ७२ यमरमनमातां सक् च एषां
सगागमः स्यात् सिच इट् च अयंसीत् अयंसिषाम् अनंसीत् अयासीत् अयासिषाम् अलासिषुः हलन्तलक्षणा वृद्धिः सान्तेटीति निषिध्यते आतिन आयंस्त अरंसाताम् अनंसत ७३
स्मिपूङ्रञ्ज्वशां सनि स्मिपूङ्रञ्ज्वशां सनीट् सिस्मयिषते पिपविषते अरिरिषति अञ्जिजिषति अशिशिषति पूङ्‌ किति ङित्करणात्सत्रो मा भूत् पुपूषति अरिरुदिषत् अ
यानेत्यनित्यमिडस्त्येव ७४ किरश्च पञ्चभ्यः कृगृदृधृप्रछिभ्यः सनइट् चिकरिषति जिगरिषति दिदरिषते दिधरिषते पिपृच्छिषति पञ्चभ्यः किं सिसृक्षति रुधादिभ्यः सार्वधा
तुके पञ्चभ्यस्त्वनुवर्तते रुदस्वपश्वसप्राणजक्षिभ्यः परस्य वलादेः सार्वधातुकस्येट् रोदिति स्वपितः श्वसित प्राणिताम् अजक्षिताम् पञ्चभ्यः किम् जागर्ति सार्वधातुके इति किं
म् स्वप्ता वलादेरित्येव रुदन्ति ७५ ईशः से ईशः परस्य सेरुदस्य सार्वधातुकस्येट् ईशिषे ईशिष्व एकदेशविकृतस्यानन्यत्वात् ७६ ईडजनोर्ध्वे च ईडजनिभ्यां परस्य ध्वस्य सस्य चास्येर
सस्य च सार्वधातुकस्येट् ईडिध्वे ईडिध्वम् ईडिषे ईडिष्व जनिध्वे जनिषे चकारादीशोऽपि ध्वेऽइट् ईशिध्वे ७७ लिङः सलोपोऽनन्त्यस्य सेति लुप्तषष्ठीकम् सार्वधातुके लिङः संबन्धिनो २॰ ४

अतो येयः ८ आतो ङितः आने मुक् ईदासः अष्टन आ विभक्तौ रायो हलि युष्मदस्मदोरनादेशे द्वितीयायां च प्रथमायाश्च द्विवचने भाषायाम् योऽचि शेषे लोपः मपर्यन्तस्य युवावौ द्विवचने ~~[illegible]~~ यूयवयौ जसि त्वाहौ
सौ तुभ्यमह्यौ ङयि तवममौ ङसि त्वमावेकवचने प्रत्ययोत्तरपदयोश्च त्रिचतुरोः स्त्रियां तिसृचतसृ अचि र ऋतः जराया जसन्यतरस्याम् त्यदादीनामः किमः कः कुतिहोः क्वाति तदोः सः सावनन्त्ययोः अदस औ सुलोपश्च इदमो मः ।

तस्य स्यस्य लोपः कुर्यात् कुर्वीत अनन्त्यस्य किम् कुर्युः सार्वधातुकस्यैव क्रियास्ताम् कुर्षीष्ट ७९ अतो येयः येतिलुप्तषष्ठीकम् अतोऽङ्गात्परस्य सार्वधातुकस्य यासः इयादेशः पचेरन् प
चेयुः अतः किम् चिनुयात् तपरः किम् यायात् सार्वधातुकस्यैव चिकीर्ष्यात् ८० आतो ङितः अतोऽङ्गात्परस्य सार्वधातुकस्य ङित आकारस्य इयादेशः पचेते पचेथे अतः किम् त
न्वाते ये आतः किम् पचन्ति ङितः किम् पचावहै अतस्यैव चिन्वाते तपरकरणं किम् मिमाते ८१ आने मुक् अद्वर्णान्तस्याङ्गस्य आने परे मुगागमः प
चमानः अतः किम् कुर्वाणः हनानः ८२ ईदासः आन इत्यनुवर्तते तस्य आसः परस्यानस्य ईकारादेशः आसीनो यजते ८३ अष्टन आ विभक्तौ विभक्तौ परतोऽष्टनशब्दस्याकारा
न्तादेशः स्यात् अष्टाभिः अष्टासु विभक्ताविति किम् अष्टत्वम् ८४ रायो हलि रजेर्हैरित्यतः आ विभक्त्यधिकारः हलादौ विभक्तौ रैशब्दस्याकारादेशः राभ्याम् रासु ८५ युष्मदस्म
दोरनादेशे यत्र विभक्तावादेशो नोक्तस्तत्र युष्मदस्मदोराकारादेशः युष्माभिः अस्माभिः अनादेशे किम् युष्मत् अस्मत् ८६ द्वितीयायां च द्वितीयायां विभक्तावनयोराकारः त्वाम् माम् ।
युवाम् आवाम् युष्मान् अस्मान् ८७ प्रथमायाश्च द्विवचने भाषायाम् अनयोराकारादेशः युवाम् आवाम् प्रथमायाइति किम् युवयोः आवयोः द्विवचने किम् त्वम् अहम् यूयम् वयम्
भाषायां किम् युवं वस्त्राणि ८८ योऽचि अजादौ विभक्तावनादेशे नयोर्यादेशः त्वया मया त्वयि मयि युवयोः आवयोः अचीति किम् युवाभ्याम् आवाभ्याम् ८९ शेषे लोपः यत्र विभक्ता
वाकारो यकारश्च न विहितस्तत्र शेषे परतो नयोर्लोपः पञ्चम्याश्चतुर्थ्याश्च षष्ठीप्रथमयोश्च यान्यद्विवचनान्यत्र शेषे लोपो विधीयते परत्वे शेषे लोपं टिलोपमाहुः वक्ष्यमाणादेशा
पेक्षः शेषस्तेचादेशा मपर्यन्तस्येति मपर्यन्तादेशान्तः स शेषस्तत्रस्थानेलोपः परत्वि त्वम् अहम् यूयम् वयम् तुभ्यम् मह्यम् युष्मभ्यम् अस्मभ्यम् त्वत् मत् युष्मत् अस्मत् तव मम युष्माकम्
अस्माकम् ९० मपर्यन्तस्य अयमधिकारः एतत्पदमग्रेसर्वत्रोपतिष्ठते ९१ युवावौ द्विवचने द्विवचनार्थे वर्तमानयोर्युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तः विभक्तौ युवाम् आवाम् युवयोः आ
वयोः ९२ यूयवयौ जसि अनयोर्मपर्यन्तस्य यूयम् वयम् ९३ त्वाहौ सौ अनयोर्मपर्यन्तस्य त्वअह इत्येतावादेशौ स्तः सौ परे त्वम् अहम् ९४ तुभ्यमह्यौ ङयि अनयोर्मपर्यन्तस्य इमौ स्तः ङे परतः
तुभ्यम् मह्यम् ९५ तवममौ ङसि तव मम ९६ त्वमावेकवचने एकत्वार्थे वर्तमानयोरनयोर्मपर्यन्तस्य त्वमावादेशौ स्तः विभक्तौ त्वाम् माम् त्वया मया त्वत् मत् त्वयि मयि ९७ प्रत्ययो
त्तरपदयोश्च प्रत्यये उत्तरपदे च परत एकत्वार्थयोरनयोर्मपर्यन्तस्य त्वमौ स्तः त्वदीयः मदीयः त्वत्पुत्रः मत्पुत्रः मन्नाथः त्वन्नाथः एकवचनस्यैव युष्मदीयः अस्मदीयः युष्मत्पुत्रः अस्मत्पु
त्रः विभक्तावित्यधिकारात् अत्राप्यादेशविधानार्थारम्भः ९८ त्रिचतुरोः स्त्रियां तिसृचतसृ स्त्रीत्वे वर्तमानयोस्त्रिचतुरोः शब्दयोः क्रमात् तिसृचतसृ इत्यादेशौ भवतः विभक्तौ परतः तिस्रः
चतस्रः स्त्रियां किम् त्रयः त्रीणि चत्वारः चत्वारि ९९ अचि र ऋतः एकौ ऋकारादेशयोः ऋतः स्थाने रेफादेशोऽजादौ विभक्तौ परतः तिस्रः चतस्रः स्त्रियां किम् पूर्वसवर्णो त्वडिः सर्वनाम
स्यात् नु णो नाम अपवादः अचीति किम् तिसृभिः १० जराया जरसन्यतरस्याम् जराशब्दस्य वा जरसादेशोऽजादौ विभक्तौ परतः जरसादन्ताः पीर्यन्ते जरया जरसे जरायै अचीत्येव जरा
भ्याम् ११ त्यदादीनामः त्यदादीनां द्विपर्यन्तानाम् अकारादेशो विभक्तौ स्यः तौ ते १२ किमः कः विभक्तौ कः कौ के १३ कु तिहोः तादौ हादौ विभक्तौ परतः किमः कु इत्यादेशः
कुतः कुत्र कुह सत्त्वस्य तकारे हकारे उच्चारणार्थः १४ क्वाति अदिति विभक्तौ परतः किमः क कुगन्त्वा १५ तदोः सः सावनन्त्ययोः अनन्त्ययोस्त्यदादीनां तकारदकारयोः सकारा
देशः स्यात् सौ परतः स्यः सः एषः असौ अनन्त्ययोरिति किम् हे स हे सा १६ अदस औ सुलोपश्च अदस औकारान्तादेशः सौ परतः सोर्लोपश्च स्यात् असौ १७ इदमो मः इदमो मस्य म एव सौ

दश्च यः सौ इदोऽय् पुंसि अनाप्यकः हलि लोपः मृजेर्वृद्धिः अचो ञ्णिति अत उपधायाः तद्धितेष्वचामादेः किति च । इति सप्तमाध्यायस्य द्वितीयः पादः २ देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् केकयमित्रयुप्रलयानां यादेरियः
न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् द्वारादीनां च न्यग्रोधस्य च केवलस्य न कर्मव्यतिहारे स्वागतादीनां च श्वादेरिञि पदान्तस्यान्यतरस्याम् उत्तरपदस्य च अवयवादृतोः सुसर्वार्धाज्जनपदस्य दिशोऽमद्राणाम् प्राचां ग्रामनगराणाम् संख्यायाः संवत्सरसंख्यस्य च वर्षस्याभविष्यति ॥

त्यदाद्यत्वं बाध्यते अयम् इयम् १८ दश्च इदमो दस्य मकारादेशो विभक्तौ इमौ इमे १९ यः सौ इदमो दस्य यकारादेशः सौ इयम् उत्तरसूत्रे पुंसि वचनात् स्त्रियामयमादेशो गम्यते १० इदोऽय् पुंसि इद
अ॰ ७ स्मैव स्थितं रदस्य अयमादेशः पुंसि सौ अयम् ११ अनाप्यकः आबिति प्रत्याहारः तृतीयैकवचनात् प्रभृत्यासुपः पकारात् इदस्यान्तवर्णेऽककरतीति तद्विशेषणम् अककारस्य इदमः इद
३ अनादेशः स्यादापि विभक्तौ अनेन अनयोः अकः किम् इमकेन इमकयोः १२ हलि लोपः हलादौ विभक्तावककारस्य इदम इदो लोपः स्यात् आभ्याम् एभिः अककारस्यैव इमकाभ्याम् १३ मृजेर्वृ
२१ द्धिः विभक्ताविति निवृत्तम् मृजेरङ्गस्येको वृद्धिः स्यात् मार्ष्टि मार्ष्टा १४ अचो ञ्णिति अजन्ताङ्गस्य वृद्धिर्ञिति णिति च परे कारः हारकः गावौ सखायौ १५ अत उपधायाः अङ्गोपधा
भूतस्याकारस्य वृद्धिर्ञ्णिति पाकः त्यागः पावकः अतः किम् भेदयति उपधाया इति किम् चकासति १६ तद्धितेष्वचामादेः ञिति णित्तद्धितेषु परतोऽङ्गस्याचामादेरचो वृद्धिर्भवति ।
गार्ग्यः दाक्षिः औपगवः १७ किति च किति तद्धिते च परतोऽङ्गस्याचामादेरचो वृद्धिः नाडायनः आतिकः १८ ॥ इति श्रीसत्रार्थसंग्रहे सप्तमाध्यायस्य द्वितीयः पादः समाप्तः ॥ ॥
देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् एषामङ्गानामचामादेरचो वृद्धिप्रसङ्गे आकारादेशः ञिति किति तद्धितेषु परतः देविकायां भवं दाविकं पयः शिंशपाया विकारः शांश
पश्चमसः दित्यौहः दात्यौहम् दीर्घसत्रे भवं दार्घसत्रम् श्रेयसि भवः श्रायसः १ केकयमित्रयुप्रलयानां यादेरियः एषां यादेरियादेशः तद्धिते ञिति णिति किति च परतः केकयस्यापत्यं
कैकेयः मित्रयूनां भावेन श्लाघा मैत्रेयिका प्रलयादागतं प्रालेयमुदकम् २ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् पदान्ताभ्यां य्वाभ्यां परस्याचामादेरचो न वृद्धिः किं तु ताभ्यां पूर्वमैजागमः क्रमा
त्स्यात् व्यसने भवं वैयसनम् व्याकरणमधीते वैयाकरणः स्वश्वस्यापत्यं सौवश्वः य्वाभ्यां किम् अर्थाय अयं आर्थः पदान्ताभ्यां किम् याज्ञिकः ३ द्वारादीनां च एषां य्वाभ्यां परस्यादेरचो न वृ
द्धिस्ताभ्यां पूर्वमैच् अपदान्तार्थमिदम् द्वारे नियुक्तो दौवारिकः नद्वारिविधिस्त्वत्र दौवारपालः द्वार स्वर स्वाध्याय व्यल्कश स्वस्ति स्वकृत स्वादुमृदु श्वन् स्व इति द्वारादयः ४ न्यग्रोध
स्य च केवलस्य यकारात्परस्यादेरचो न वृद्धिस्तदागमश्च नैयग्रोधश्चमसः केवलस्य किम् न्याग्रोधमूलाः शालयः ५ न कर्मव्यतिहारे पूर्वोक्तम् व्यावक्रोशी व्यावहासी ६ स्वागतादीनां च पूर्वोक्तं
न स्वागतमित्याह स्वागतिकः स्वाध्वरस्याङ्गं व्यङ्गं व्यवहारस्यापत्यमिति ७ श्वादेरिञि श्वादेरङ्गस्येञि परे पूर्वोक्तं न श्वभस्त्रापत्यं श्वाभस्त्रिः ८ पदान्तस्यान्यतरस्याम् श्वादेरङ्ग
स्य पूर्वोक्तं वा न श्वपदस्येदं श्वापदं शौवापदम् ९ उत्तरपदस्य च अधिकारोऽयं हनस्तोऽचिण्णलोः प्राक् १० अवयवादृतोः अवयववाचिपदादुत्तरपदस्य ऋतुवाचिनो अचामादेरचो वृद्धिः ञिति किति तद्
धितेषु परतः पूर्ववार्षिकम् पूर्वहैमनम् एकदेशिसमासः पूर्वं वर्षाणां पूर्ववर्षं तत्र भवं ठक् पूर्वं हेमन्तस्य पूर्वहेमन्तं तत्र भवं अण् ऋतोर्लोपश्च अवयवादिति किम् पूर्वासु वर्षासु भवं पौ
र्ववार्षिकम् ११ सुसर्वार्धाज्जनपदस्य सुसर्वार्धेभ्य उत्तरपदस्य जनपदवाचिनोऽचामादेरचो वृद्धिः ञिति किति च तद्धिते सुपाञ्चालकः सार्वपाञ्चालकः आर्धपाञ्चालकः १२ दिशोऽमद्राणाम्
दिग्वाचिन उत्तरपदस्य मद्रभिन्नजनपदवाचिनः पूर्वोक्तं स्यात् पूर्वपाञ्चालकः दिश इति किम् पूर्वः पञ्चालानाम् पूर्वपञ्चालस्तत्र भवः पौर्वपाञ्चालः अमद्राणां किम् पौर्वमद्रः १३ प्राचां ग्राम
नगराणाम् दिश उत्तरपदानां प्राचां देशे ग्रामनगराणां प्राग्वत् स्यात् पूर्वेषुकामशम्यां भवः पूर्वेषुकामशमः पूर्वकार्ष्णमृत्तिकः पूर्वपाटलिपुत्रकः दिक्पूर्वपदो द्विसमुदायः पूर्वेषु
कामशम्यादिर्ग्रामनाम पाटलिपुत्रादि उत्तरपदमेव नगरनाम १४ संख्यायाः संवत्सरसंख्यस्य च संवत्सरस्य संख्यायाश्च संवत्सरसंख्येत्यसमाहारे एकवद्भावः संख्यावाचिपदादुत्तरपदस्य सं
वत्सरवाचिनः संख्यावाचिनश्च प्राग्वत् द्वौ संवत्सरौ भृतो द्विसांवत्सरिकः द्वे षष्टी भृतो द्विषाष्टिकः द्विसाप्ततिकः १५ वर्षस्याभविष्यति संख्याया उत्तरपदस्य वर्षशब्दस्य प्राग्वत् स्या २१

परिमाणान्तस्यासंज्ञाशाणयोः जे प्रोष्ठपदानाम् हृद्भगसिन्ध्वन्ते पूर्वपदस्य च अनुशतिकादीनां च ८ देवताद्वन्द्वे च नेन्द्रस्य परस्य दीर्घाच्च वरुणस्य प्राचां नगरान्ते जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् अर्धात्परिमाणस्य पूर्वस्य तु वा नातः परस्य प्रवा-
हणस्य ढे तत्प्रत्ययस्य च नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् यथातथयथापुरयोः पर्यायेण हनस्तोऽचिण्णलोः आतो युक् चिण्कृतोः नोदात्तोपदेशस्य मान्तस्यानाचमेः जनिवध्योश्च अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ

त तद्धितस्येञ्ज्विषयदर्शनेन द्वे वर्षे अधीष्टो भृतो भूतो भावी वा द्विवार्षिकः अभविष्यतीति किम् त्रीणि वर्षाणि भावि त्रैवर्षिकम् यत्र त्रैवर्षिकं धान्यं निहितं भृत्यवृत्तये अधिकं वापि विद्येत स सोमं पातुमर्हति १६ परिमाणान्तस्यासंज्ञाशाणयोः संख्याया उत्तरपदस्य परिमाणान्तस्याङ्गस्य वृद्धिः स्यात् संज्ञाविषये शाणे चोत्तरपदे न द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः त्रिभिः सुवर्णैः क्रीतं त्रिसौवर्णिकम् असंज्ञेत्यादि किम् पञ्च लोहिन्यः परिमाणमस्य पञ्चलोहितिकम् द्वाभ्यां शाणाभ्यां क्रीतं द्विशाणम् १७ जे प्रोष्ठपदानाम् जरति जातार्थो निर्दिश्यते प्रोष्ठपदानामुत्तरपदस्य वृद्धिर्जातार्थे तद्धिते प्रोष्ठपदासु जातः प्रौष्ठपादः जरति किम् प्रोष्ठपदो माणवः बहुवचनं पर्यायस्यापि ग्रहः भाद्रपादः १८ हृद्भगसिन्ध्वन्ते पूर्वपदस्य च अन्तशब्दस्य ... समुदायेऽङ्गे उत्तरपदस्य पूर्वपदस्य चाचामादेरचो वृद्धिः ञिति णिति किति सौहार्दम् सौभाग्यम् सक्तुप्रधानेषु सिन्धुषु भवाः साक्तुसैन्धवाः १९ अनुशतिकादीनां च उभयपदवृद्धिः अनुशतिकस्येदमानुशातिकम् पुष्करसदोऽपत्यं पौष्करसादिः ऐहलौकिकम् पारदारिकः आधिभौतिकमित्यादि २० देवताद्वन्द्वे च उभयपदवृद्धिः स्यात् आग्निमारुतं कर्म २१ नेन्द्रस्य परस्य परस्येन्द्रस्य न वृद्धिः सौमेन्द्रम् परस्य किम् ऐन्द्राग्नम् २२ दीर्घाच्च वरुणस्य दीर्घात्परस्य वरुणस्य न वृद्धिः ऐन्द्रावरुणम् मैत्रावरुणम् दीर्घात्किम् आग्निवारुणम् २३ प्राचां नगरान्ते प्राचां देशे नगरान्तेऽङ्गे उभयपदवृद्धिः सुह्मनगरे भवः सौह्मनागरः प्राचामिति किम् मद्रनगरमुदक्षु तत्र भवो माद्रनगरः २४ जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् जङ्गलाद्यन्तस्याङ्गस्य पूर्वपदस्य वृद्धिः स्यादुत्तरपदस्य तु विभाषितं विकल्पेन वृद्धिरित्यर्थः कौरुजाङ्गलं कौरुजङ्गलम् वैश्वधैनवम् वैश्वधेनवम् सौवर्णवालजम् सौवर्णवलजम् २५ अर्धात्परिमाणस्य पूर्वस्य तु वा अर्धशब्दात्परस्य परिमाणवाचिन उत्तरपदस्य वृद्धिः स्यात् पूर्वपदस्य तु वा अर्धद्रोणेन क्रीतम् आर्धद्रौणिकम् अर्धद्रौणिकम् २६ नातः परस्य अर्धात्परस्य परिमाणवाचिनोऽकारस्य न वृद्धिः पूर्वस्य तु वा आर्धप्रस्थिकः अर्धप्रस्थिकः अतः किम् आर्धकौडविकः तपरकरणं किम् आर्धखारी २७ प्रवाहणस्य ढे प्रवाहणस्योत्तरपदस्य वृद्धिः ढे परे पूर्वस्य तु वा प्रवाहणस्यापत्यं प्रावाहणेयः २८ तत्प्रत्ययस्य च ढप्रत्ययान्तप्रवाहणस्योत्तरपदस्य वृद्धिस्तद्धिते पूर्वस्य तु वा प्रवाहणेयस्यापत्यं प्रावाहणेयिः प्रवाहणेयिः ... विकल्पेनाबाधकत्वात् नित्यमारम्भः २९ नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् नञः परेषां शुच्यादीनां वृद्धिः पूर्वस्य तु वा अशौचम् आशौचम् अनैश्वर्यम् आनैश्वर्यम् अक्षेत्रज्ञम् अकौशलम् अनैपुणम् ... इत्यादि ३० यथातथयथापुरयोः पर्यायेण नञः परयोरनयोः पूर्वोत्तरपदवृद्धिः पर्यायेण स्यात् यथासादृश्ये अव्ययीभावे ... पश्चान्नञ्समासः अतस्तद्धितः अयथातथस्य भाव आयथातथ्यम् अयाथातथ्यम् आयथापुर्यम् अयाथापुर्यम्।
३१ हनस्तोऽचिण्णलोः तद्धिते ... हनस्तादेशो ञ्णिति चिण्णलोर्वर्जयित्वा घातयति घातकः साधुघाती घातम् घातः अचिण्णलोरिति किम् अघानि जघान ३२ आतो युक् चिण्कृतोः आकारान्तस्याङ्गस्य युगागमः स्यात् चिणि ञ्णिति कृति च अदायि धायः दायकः चिण्कृतोरिति किम् ददौ दधौ ३३। नोदात्तोपदेशस्य मान्तस्यानाचमेः उपदेशोदात्तो मान्तस्य धातोरुपधाया वृद्धिर्न चिणि ञ्णिति कृति च अशमि ... शमकः तमकः शमः तमः दमः उदात्तोपदेशस्य किम् यामकः रामकः मान्तस्य किम् पाठकः अनाचमेरिति किम् आचामकः ३४ जनिवध्योश्च चिण्कृतोर्न वृद्धिः अजनि जनकः अवधि वधकः वधिः प्रकृत्यन्तरम् ... तादेशस्य ... ३५ अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ ... आकारान्तानां च णौ परतः पुगागमः अर्पयति ह्रेपयति व्लेपयति रेप-

शाच्छासाह्वाव्यावेपां युक् वो विधूनने जुक् लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने भियो हेतुभये षुक् स्फायो वः शदेरगतौ तः रुहः पोऽन्यतरस्याम् प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः न यासयोः उदीचामातः स्थाने यकपूर्वायाः भस्त्रैषाजाज्ञा-
द्वास्वा नञ्पूर्वाणामपि अभाषितपुंस्काच्च आदाचार्याणाम् ठस्येकः इसुसुक्तान्तात्कः चजोः कु घिण्ण्यतोः न्यङ्क्वादीनां च हो हन्तेर्ञ्णिन्नेषु अभ्यासाच्च हेरचङि सन्लिटोर्जेः विभाषा चेः न क्वादेः अजिव्रज्योश्च ६०

ग्रू॰ धा यति क्नोपयति क्ष्मापयति रापयति धापयति ३६ शाछासाह्वाव्यावेपां युक् ऐणौ शाययति छाययति साययति ह्वाययति व्याययति वाययति पाययति ३७ वो विधूनने जुक् वा इत्य
स्य विधूनने णौ जुगागमः णौ वाजयति विधूनने किम् वापयति केशान् लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने अनयोरिमावागमौ भवतः स्नेहद्रवणे णौ विलीनयति विलापयति
२२ विलालयति विलापयति वा घृतम् ३९ भियो हेतुभये षुक् भी धातोर्णौ षुगागमः प्रयोजकाद्भयं स्यात् मुण्डो भीषयते हेतुभये किम् कुञ्चिकयैनं भापयति ४० स्फायो वः स्फायी धातो
र्वकारादेशः णौ स्फावयति ४१ शदेरगतौ तः शदेस्तकारादेशः स्यात् निमित्ते णौ परतः पुष्पाणि शातयति गतौ तु गाः शादयति गोपालः ४२ रुहः पोऽन्यतरस्याम् रुहेरस्य पकारादेशो वा
णौ व्रीहीन्रोपयति रोहयति ४३ प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः प्रत्ययस्थात्ककारात्पूर्वस्यात इदादेशः स्यादापि परे स चेदापसुपः परो न भवति चेत् कारिका हारिका प्रत्ययस्थ
ग्रहणं किम् शक्नोतीति शका कादिति किम् नन्दना पूर्वस्येति किम् परस्य माभूत् मद्रका अतः किम् गोका तपरकरणं किम् राका आपीति किम् कारकः असुपः किम् बहुपरि
व्राजिका सर्वत्रात्वपरिव्राजकशब्दाद्यमापः ४४ न यासयोः अनयोः कात्पूर्वस्यातः इन्न यका सका यकां तकाम् ४५ उदीचामातः स्थाने यकपूर्वायाः आतः स्थाने यकारककारपूर्वा
याः स्त्रियः अस्य इत्वमुदीचां मतेन स्यात् उदीचांग्रहणं विकल्पार्थम् इभ्यिका इभ्यका क्षत्रियिका क्षत्रियका चटकका चटकिका आत इति किम् सांकाश्यभवा सांकाशिका यकपूर्वा
याः इति किम् अश्विका ४६ भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि एषामनञ्पूर्वाणामप्यातः स्थाने यो काः तत्स्थाने इत्वमुदीचां मते अपिशब्दात्केवलानां चेति
पि रयमिष्यते नञ्पूर्वाणामपीति वचनं तत्र उत्तरपदस्य भस्त्रादिसंबन्धी प्रतिपत्त्यर्थं भस्त्रा भस्त्रिका अभस्त्रिका निर्भस्त्रिका बहुभस्त्रिका एवं भस्त्रकेत्यादि एषका एषिका अजिका अनजिका ज्ञि
का अज्ञिका एवमजकेत्यादि द्वके द्विके स्विका अस्विका स्वका अस्वका एषा हे नञ्पूर्वत्वं न प्रयुज्यते तत्र यदि सा कन्या भ्यां नञ्समासः कृते वा नञ्समासे पश्चादकच् उभयथा समासादि
भक्तो न सदा न भागं भवति समासान्तर्वर्तिविभक्त्या स्वनास्मरणीत्वप्राप्तिरेव नास्ति तेनात्रैषका अद्वके रेत्येव स्यात् स्वशब्दस्य ज्ञातिधनाख्यायामसर्वनामत्वात् नञ्पूर्वोऽपि प्रयुज्यते भ
स्त्राशब्दस्य भाषितपुंस्कत्वस्याभाषितपुंस्काच्चेत्येव सिद्धे ग्रहणमुपसर्जनार्थम् न विद्यते भस्त्रा यस्याः सा अभस्त्रा अल्पा सा अभस्त्रिका ४७ अभाषितपुंस्काच्च अस्मादिह्नित स्यातः स्थाने अतऽइत्त्वो
दीचाम् खट्वका अखट्वका परमखट्वका एवं खट्विकेत्यादि न विद्यते खट्वा अस्याः सा अखट्वा अल्पा सा अखट्विका एवमतिखट्विका अभाषितपुंस्कत्वान्न प्राप्नुयात् ४८ आदाचार्या
णाम् अभाषितपुंस्कादात स्थाने अत आदेशः स्यादाचार्याणां मते खट्वाका अखट्वाका ४९ ठस्येकः ठस्य प्रत्ययस्येकादेशः आक्षिकः लावणिकः ५० इसुसुक्तान्तात्कः अन्तश्च सर्वस्येव
न्ती उक् त्यादाद् इसन्तादुसन्तादुगन्तात्तान्तात् परस्य ठस्य कादेशः इकापवादः सार्पिष्कः धानुष्कः नैषादकर्षुकः शाबरजम्बुकः मातृकम् पैतृकम् औदश्वित्कः शाकृत्कः ५१ चजोः कु घिण्ण्यतोः चजयोः
कवर्गादेशः घिति ण्यति च प्रत्यये परे पाकः रागः वाक्यम् भोग्यम् ५२ न्यङ्क्वादीनां च कवर्गादेशः न्यङ्कुः नावेचेरुः मद्गुः भृगुः तक्रम् वक्रम् नाचिवद्धीरः ५३ हो हन्तेर्ञ्णिन्नेषु हन्ते
र्हस्य कुः ञिति णिति प्रत्यये नकारे च परतः घातकः घातः घ्नन्ति हन्तीति किम् अहोन्नस्य माभूत् हन्तेः किम् प्रहारः ५४ अभ्यासाच्च परस्य हन्तेर्हस्य कुः जिघांसति जङ्घन्यते ५५ हेरचङि अ
भ्यासात्परस्य हिनोतेर्हस्य कुः स्यादचङि च प्रत्यये परे प्रजिघीषति प्रजेघीयते प्रजिघाय अचङि किम् प्राजीहयत् ५६ सन्लिटोर्जेः अभ्यासात्परस्य जेः कुः सनि लिटि च जिगीषति जिगाय अ २२
जेजीयते ५७ विभाषा चेः अभ्यासात्परस्य चिनोतेः कुर्वा सन्लिटोः चिकीषति चिचीषति चिचाय चिकाय अचङ् चेचीयते ५८ न क्वादेः कवर्गादेर्धातोर्न कुः कूजः खर्जः गर्जः ५९ अजिव्र

भुजन्युब्जौ पाण्युपतापयोः प्रयाजानुयाजौ यज्ञाङ्गे वञ्चेर्गतौ ओक उचः के ण्य आवश्यके यजयाचरुचप्रवचर्चश्च वचोऽशब्दसंज्ञायाम् प्रयोज्यनियोज्यौ शक्यार्थे भोज्यं भक्ष्ये घोर्लोपो लेटि वा ओतः श्यनि क्सस्याचि लुग्वा दुह
दिहलिहगुहामात्मनेपदे दन्त्ये शमामष्टानां दीर्घः श्यनि ष्ठिवुक्लमुचमां शिति इषुगमियमां छः पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ज्ञाजनोर्जा प्वादीनां ह्रस्वः ८ मीनातेर्निगमे मिदेर्गुणः
क्रमः परस्मैपदेषु

त्योश्च न कुः समाजः व्रजः ६० भुजन्युब्जौ पाण्युपतापयोः निपात्येते भुज्यते अनेनेति भुजः पाणिः हलश्चेति घञ् निकुत्वगुणाभावः न्युब्जिताः शेरते अस्मिन्निति न्युब्ज उपतापो रोगः तयोरेव वक्ति
कुत्वाभावः अन्यत्र भोगः समुद्गः ६१ प्रयाजानुयाजौ यज्ञाङ्गे निपात्येते पञ्च प्रयाजाः एकादशानुयाजाः यज्ञाङ्गे किम् प्रयागो नुयागः ६२ वञ्चेर्गतौ न कुत्वम् वञ्च्यं वञ्चन्ति वणिजः
गतौ किम् वङ्कं काष्ठं कुटिलमित्यर्थः ६३ ओक उचः के उचेर्धातोः कप्रत्यये परे ओक इति निपात्यते न्योकः शकुन्तः कुत्वं गुणश्च निपातनात् ६४ ण्य आवश्यके आवश्यकेर्थे ण्ये परे नो धा
तोः कुत्वं न अवश्यपाच्यम् अन्यत्र पाक्यम् ६५ यजयाचरुचप्रवचर्चश्च एषां ण्ये न कुत्वम् याज्यम् याच्यम् रोच्यम् प्रवाच्यम् अर्च्यम् ६६ वचोऽशब्दसंज्ञायाम् ण्यति न कुत्वम् वा
च्यमाह अशब्दसंज्ञायां किं वाक्यमाह ६७ प्रयोज्यनियोज्यौ शक्यार्थे निपात्येते प्रयोक्तुं शक्यः प्रयोज्यः एवं नियोज्यः अन्यत्र प्रयोग्यो नियोग्यः ६८ भोज्यं भक्ष्ये निपात्यते भक्ष्यमभ्य
वहार्यम् भोज्य ओदनः भक्ष्ये किम् भोग्यः कंबलः ६९ घोर्लोपो लेटि वा लेटि परे घुसंज्ञानां वा लोपः दधद्रत्नानि दाशुषे सोमो ददद्गन्धर्वाय यदग्निरग्नये ददात् ७० ओतः श्यनि श्यनि
परे ओकारान्ताङ्गस्य लोपः छो छ्यति शो श्यति ७१ क्सस्याचि अजादौ प्रत्यये क्सस्य लोपः अलोऽन्त्यस्य अधुक्षाताम् अचि किम् अधुक्षत ७२ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये एषां क्स
स्य लुग्वा आदिदन्त्यवर्णे परे अदुग्ध अधुक्षत अदुग्ध्वहि अधुक्षावहि अदिग्ध अधिक्षत अलीढ अलिक्षत न्यगूढ न्यघुक्षत येन अधुक्षत दन्त्ये किम् अधुक्षामहि दुहादीनामिति किम् व
व्यक्षिक्षत लोपाद्ग्रहणं सर्वादेशार्थम् इत्यो क्वापि वकारो न्यप वान्यथा लग्रहणमेव कृतं स्यात् शमामष्टानां दीर्घः श्यनि शमादीनामष्टानां धातूनां दीर्घो भवति श्यनि शा
म्यति ताम्यति दाम्यति श्राम्यति भ्राम्यति क्षाम्यति क्लाम्यति प्रमाद्यति अष्टानां किम् असूयति श्यनि किम् भ्रमति ७४ ष्ठिवुक्लमुचमां शिति दीर्घः ष्ठीवति क्लामति आचामति आङः यम
न्ति किम् चमति विचमति ७५ क्रमः परस्मैपदेषु क्रमो दीर्घः शिति परे क्रामति आक्रामति आक्रमते ७६ इषुगमियमां छः शिति इच्छति यच्छति गच्छति ७७ पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्ति
शदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः एषामेते आदेशाः क्रमात्स्युः शिति परे पिबति जिघ्रति धमति तिष्ठति मनति यच्छति पश्यति ऋच्छति धावति शीयते सीद
ति ७८ ज्ञाजनोर्जा शिति जानाति जायते ७९ प्वादीनां ह्रस्वः शिति पुनाति लुनीते स्तृणाति ८० मीनातेर्निगमे मीनातेरङ्गस्य ह्रस्वः शिति प्रमिणन्ति व्रतानि निगमे किम् ।
प्रमीणाति ८१ मिदेर्गुणः मिदेरङ्गस्येको गुणः शिति मेद्यति शित्येव मिद्यते ८२ जुसि च इगन्ताङ्गस्य गुणः अजादौ जुसि अबिभयुः ८३ सार्वधातुकार्धधातुकयोः अनयोः परत इगन्ताङ्ग
स्य गुणः नयति भवति तरति चेता स्तोता कर्ता अनयोः किम् अग्निकाम्यति ८४ जाग्रोऽविचिण्णल्ङित्सु जागृ इत्यस्याङ्गस्य गुणः विचिण्णल्ङिद्भिन्ने परतः जागरयति जागरकः जा
गरः जागरं जागरम् जागरितः वृद्धिविषये प्रतिषेधविषये च गुण एव अविचिण्णल्ङित्स्विति किम् जागृविः अजागारि जजागार जागृतः वीत्यकारमुच्चारणार्थं केचिद्दाङस्तेन नङ्साव
पिवादेशेन गुणः नजागृवान् ८५ पुगन्तलघूपधस्य च पुगन्तस्य लघूपधस्य च गुणः सार्वधातुकार्धधातुकयोः क्नोपयति भेदनम् ८६ नाभ्यस्तस्याचि पिति सार्वधातुके लघूपधस्य
भ्यस्तसंज्ञाङ्गस्याजादौ पिति सार्वधातुके गुणो न नेनिजानि अनेनिजम् अभ्यस्तस्य किम् वेदानि अचि किम् नेनेक्ति सार्वधातुके किम् निनेज लघूपधस्येत्येव जुहवानि ८७ भूसु
वोस्तिङि सार्वधातुके गुणो न अभूत् अभूः अभूवन् सुवै सुवावहै सुवेते लुग्विकरणस्य ग्रहणम् सुवति स्यात् तस्याः विकरणस्य ङित्त्वाद्गुणाभावः सिद्ध एव ८८ उतो वृद्धिर्लुकि हलि
पिति सार्वधातुके अनभ्यस्तस्य उकारान्ताङ्गस्य वृद्धिः लुकि सति पिति सार्वधातुके यौति नौति स्तौमि उतः किम् एति लुकि किम् सुनोति हलि किं यवानि पित्येव युतः रुतः नाभ्यस्तस्येत्येव

जुसि च सार्वधातुकार्धधातुकयोः जाग्रोऽविचिण्णल्ङित्सु पुगन्तलघूपधस्य च नाभ्यस्तस्याचि पिति भूसुवोस्तिङि उतो वृद्धिर्लुकि हलि

गुणोवृद्धि

ऊर्णोतेर्विभाषा १ तृणहइम् ब्रुवईट् यङोवा तुरुस्तुशम्यमः सार्वधातुके अस्तिसिचोऽपृक्ते बहुलंछन्दसि रुदश्च पञ्चभ्यः अड्गार्ग्यगालवयोः अटः सर्वेषाम् अतोदीर्घोयञि सुपिच बहुवचनेझल्येत् ओसिच आङिचापः संबुद्धौच
अम्बार्थनद्योर्ह्रस्वः ह्रस्वस्यगुणः जसिच ऋतोङिसर्वनामस्थानयोः घेर्ङिति आण्नद्याः याडापः सर्वनाम्नःस्याड्ढ्रस्वश्च विभाषाद्वितीयातृतीयाभ्याम् ङेराम्नद्याम्नीभ्यः इदुद्भ्याम् औत अच्चघेः आङोनाऽस्त्रियाम् ६

अ॰ धा॰ स वृद्ध्याच पोयोति ८९ ऊर्णोतेर्विभाषा ऊर्णोतेरजादौवाहलादौपितिसार्व॰ प्रौर्णौति प्रोर्णोति हलीत्येव प्रोर्णवानि ९॰ गुणोपृक्ते अपृक्तेहलिपितिसार्वधातुके ऊर्णोतेर्गुणः प्रौर्णोत् प्रौ
र्णोः ९१ तृणहइम् आगतस्यांतस्यतृहेर्धातोरिमागमः हलिपितिसार्व॰ तृणेढि तृणेक्षि तृणेह्मि अतृणेट् हलिकिम् तृणहानि पितीत्येव तृण्ढः ९२ ब्रुवईट् ब्रुवःपरस्यहलादेःपितः
२३ सार्वधातुकस्येडागमः ब्रवीति ब्रवीषि ब्रवीमि अब्रवीत् हलीत्येव ब्रवाणि पितीत्येव ब्रूतः ९३ यङोवा यङःपरस्यतस्यवाईट् लालपीति वावदीति लालप्ति वावद्मि ९४ तुरुस्तु
शम्यमःसार्वधातुके अत्रवृत्तोसार्वधातुकग्रहणमपिदृश्यम् एभ्यःपरस्यहलादेःसार्वधातुकस्यवाईट् तौति तवीति रौति रवीति अस्तौत् अस्तवीत् शाम्यध्वं शमीध्वम् अभ्यमति
अभ्यमीति शम्यमोर्विकरणलुक्सतिहलादिसार्वधातुकमनन्तरं भवति ९५ अस्तिसिचोपृक्ते अस्तेःसिजन्ताच्चपरस्यापृक्तसार्वधातुकस्येडागमः आसीत्
अकार्षीत् अलावीत् अपृक्तेकिम् अस्ति अकार्षम् ९६ बहुलंछन्दसि शाशकर आपएवेदंसलिलंसर्वमाः अहरेवासीन्नरात्रिः गोभिरक्षाः प्रत्यञ्चमत्साः अभैषीमांपुत्रक ९७ रु
दश्चपञ्चभ्यः रुदःप्रभृतिपञ्चभ्यःपरस्यसार्वधातुकस्यहलादेरपृक्तस्येडागमः अरोदीत् अस्वपीः अश्वसीत् प्राणीः अजक्षीत् पञ्चभ्यःकिम् अजागर्भवान् अपृक्तस्येत्येव रोदिति
९८ अड्गार्ग्यगालवयोः रुदादिपञ्चभ्यःपरस्यतस्याडागमः गार्ग्यगालवमतेन अरोदत् अरोदः इत्यादि अटः सर्वेषाम् अटःपरस्यतस्याडागमःसर्वेषामाचार्याणांमतेन आदत् आ
दः अपृक्तस्येत्येव अत्ति अत्सि ९९ अतोदीर्घोयञि अदन्ताङ्गस्यदीर्घोयञ्यादौसार्वधातुकेपरतः पचावः पचामः पचामि अतःकिम् चिनुवः यञिकिम् पचतः १०० सुपिच य
ञादौसुपिचातोङ्गस्यदीर्घः रामाय रामाभ्याम् अतइत्येव हरिभ्याम् यञीत्येव रामस्य १०२ बहुवचनेझल्येत् सुपीतिवर्त्तते बहुवचनेझलादौसुपिपरतोऽतोऽङ्गस्यैकारादेशः रामेभ्यः
बहुवचनेइतिकिम् वृत्ताभ्याम् झलिकिम् रामाणाम् सुपीत्येव पचध्वम् १०३ ओसिच ओसिचपरेऽदन्ताङ्गस्यैकारादेशः रामयोः १०४ आङिचापः आङितितृतीयैकवचनसंज्ञाप्राचाम्।
आबन्ताङ्गस्यैकारादेशः आङिओसिचपरतः गङ्गया रमयोः आपइतिपदुद्धरणाकिं सोमपाकृतम् १०५ संबुद्धौच आबन्ताङ्गस्यैत्वंसंबुद्धौ हेरमे १०६ अम्बार्थनद्योर्ह्रस्वः अम्बार्थाङ्गा
नांनद्यान्तानांच ह्रस्वःसंबुद्धौ हेअम्ब हेअक्क हेअल्ल हेगौरि हेसखि ह्रस्वस्यगुणः ह्रस्वान्ताङ्गस्यगुणःसंबुद्धौ हेहरे हेविष्णो हेगौरि इत्यादिषुह्रस्वविधिसामर्थ्यान्नगुणः अम्बार्थानद्योर्ह्रस्व
योर्गुणइत्येवब्रूयात् १०८ जसिच ह्रस्वान्ताङ्गस्यगुणः हरयः भानवः १०९ ऋतोङिसर्वनामस्थानयोः ऋदन्ताङ्गस्यगुणःस्यात् ङौसर्वनामस्थानेच मातरि पितरौ भ्रातरः कर्त्तारम् ११॰
घेर्ङिति गुणः हरये पटवे मुनेः घेरितिकिम् सख्या पत्या ङितिकिम् रविभ्याम् सुपीत्येव कुरुतः १११ आण्नद्याः नद्यन्ताङ्गात्परस्यङितःप्रत्ययस्याट् गौर्यै वध्वै ११२ याडापः आ
बन्ताङ्गात्परस्यङितोयाट् रमायै गङ्गायाः ११३ सर्वनाम्नःस्याड्ढ्रस्वश्च आबन्तात्सर्वनाम्नःपरस्यङितःस्याडागमःह्रस्वश्चापोभवति सर्वस्यै विश्वस्याः ११४ विभाषाद्वितीयातृतीयाभ्यां
ङितःस्याड्ढ्रस्वश्च द्वितीयायै द्वितीयस्यै तृतीयायाः तृतीयस्याः ११५ ङेराम्नद्याम्नीभ्यः नद्यन्तादाबन्तान्नीशब्दाच्चोत्तरस्यङेराम्आदेशः गौर्याम् वध्वाम् रमायाम् सेनान्याम् ११६ इदुद्भ्याम्
नदीसंज्ञाभ्यांपरस्यङेःराम् मत्याम् धेन्वाम् ११७ औत इदुद्भ्यांपरस्यङेरौदादेशः पञ्चनदीसंज्ञेन हिहोदाहरणम् मतौ धेनौ सख्यौ पत्यौ ११८ अच्चघेः घिसंज्ञात्परस्यङेरौत्वंघेश्चादादे
शः हरौ विष्णौ ११९ आङोनाऽस्त्रियाम् घेःपरस्याङोनास्यादस्त्रियाम् हरिणा वायुना अमुनाऽऽकुलेन अस्त्रियांकिं मत्या धेन्वा ॥ ॥ इतिसत्त्वार्थसंग्रहेसप्तमाध्यायस्यतृतीयःपादः ३॥
णौचङ्युपधायाह्रस्वः चङ्परेणौपरेऽङ्गस्योपधायाह्रस्वः अचीकरत् चङिकिम् कारयति उपधायाःकिम् अचकाङ्क्षत् १ नाग्लोपिशास्वृदिताम् अग्लोपिनांशासेःऋदितांचाङ्गानांणौचङि. २३

दे विकादे वतास्त्रा या भुजसुग्रो मीना नेरनोदीर्घो यजि ॥ इति सप्तमाध्याय स्य तृतीयः पादः ॥

णौचङ्युपधायाह्रस्वः नाग्लोपिशास्वृदिताम्